
वैशाखमासः
वर्षम् – ६९
सप्तमोऽङ्कः
विक्रमाब्दः २०७६
युगाब्दः ५१२१
५ मई २०१९

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



**भारती संस्कृत-मासपत्रिका**

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | सप्तदश आध्यात्मिककाव्यानि | डॉ. हर्षदेवमाधवः | ५ |
| ५ | जयपुर राजवंशेतिहासः ''कच्छवंश महाकाव्यम्'' | महामहोपाध्याय देवर्षिकलानाथ शास्त्री | ७ |
| ६ | विनायकसहस्रसिद्धयै | राजेन्द्र मोहन शर्मा | १० |
| ७ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका | ११ |
| ८ | ऋग्विधाने मन्त्रसाधनम् | दीपक पालीवाल | १२ |
| ९ | निर्भीकं कुरु मतदानम् | बुद्धिप्रकाशजांगिड़ः | १४ |
| १० | को विशेषो रसालङ्कारयोः | गजेन्द्रकुमारः कांसोटिया | १५ |
| ११ | काव्यस्यात्मा ध्वनिः | पायल जैन | १७ |
| १२ | श्रीकृष्णमन्त्रमहास्तोत्रम् | आचार्य पं. नथमलशास्त्री दाधीचः | २० |
| १३ | श्रीकृष्णमन्त्रमहास्तोत्र-समृद्धिः | आचार्य पं. नथमलशास्त्री दाधीचः | २१ |
| १४ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २२ |
| १५ | श्रीरामजन्म | पं. रमेशचन्द्र शर्मा | २४ |
| १६ | अस्माकं गुरवः | वेणीमाधव गो. धर्माधिकारी | २५ |
| १७ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | २५ |
| १८ | भारतभूम्याः विभूतयः | अविनाश शर्मा | २६ |
| १९ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २८ |
| २० | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |
| २१ | संस्कृतसमाचाराः | प्रधानसम्पादकः | ३५ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**


**दूरभाषः 0141–2379014, मो. 9783105699**


**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**
स्व. जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

प्रेरणास्रोतः
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

राजीव दाधीच
व्यवस्थापक

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974

## मङ्गलाचरणम्

ज्येष्ठेमा स्यसिते दले विधिसुतो भूमावतीर्णो मुनिः,
ब्रह्माण्डे त्वरयाऽभ्रमद् मुनिरयं ज्ञातुं नवीनं सदा।
सर्वेभ्यः प्रथमं प्रयच्छति बुधो वृत्तं जनेभ्यो मुनिः,
शुक्रे मास्यसिते दले जनिमितं वन्दामहे नारदम्।।

## मासावतरणम्

मध्याह्ने दिवसेश्वरस्य किरणैः सन्तापिता मानवाः,
गेहे गर्भगृहे स्वपन्ति सुखिनः स्वीयैः कलत्रैः सह।
गाहन्ते पशवो निपानसलिलं घर्मेण सम्पीडिताः,
ज्येष्ठस्याद्भुतगौरवं जगति को ज्ञातुं समर्थो जनः।।

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

वैशाखमासः
वर्षम् 69
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2076
मई, 2019
अङ्कः -7
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# शैशवं रक्षन्तु मा निर्मान्तु इंटरनेटपराधीनम्

...✍ पं. प्यारेमोहनशर्मा

भारते इंटरनेटप्रयोगोऽहर्निशं वर्धते नहि सर्वकारः किमपि चिन्तयति न च समाजः। अस्मासु अनावश्यका विषयाः समधिकं स्थानं गृह्णन्ति। वास्तविकसमस्याभिः वयम् अपरिचिता भवेम। यदि एतादृशी स्थितिरेवं वर्धिष्यते तर्हि शैशवं विनंक्ष्यति। यस्य कल्पनामपि वयं न कुर्मस्तादृशी स्थितिः भारतस्य भविष्यति। यतः प्रभृति इंटरनेटोऽस्माकं जीवने समायातः ततः प्रभृति शिशवः वृद्धाः युवानश्च सर्वे काल्पनिकसंसारे विलुप्ताः संजाताः।

वयं पश्यामः पञ्चवर्षीयो बालकोऽपि नेत्रोन्मीलने जाते मोबाइलं सोत्सुकमुत्थापयति। पूर्वं वयस्काः स्वकीय-कार्येभ्यः अस्य प्रयोगं कुर्वन्तिस्म अधुना शिशवोऽपि इंटरनेटमेवाभिलषन्ति। सर्वाणि वस्तूनि इंटरनेटसमुपलब्धानि जायन्ते। आधुनिकाः शिशवः इन्टरनेटप्रेमिणोऽजायन्त। एतेषां शैशवं रचनात्मकानि कार्याणि विहाय डेटाकानने भ्रमति। विगतवर्षेभ्यः सूचनातन्त्रेण यथोन्नतिः कृता तेन मानवजीवनमेव परिवर्तितं संजातम्। अस्माकं जीवनशैली एव परिवर्तिता जाता। बालका युवानश्च क्षणमात्रमपि आत्मानं (स्मार्टफोन) चमत्कृतमोबाइलयन्त्रतो दूरं कर्तुं नाभिलषन्ति। एषु मदिरावत् मादकता सदैव विराजते।

पितरोऽपि स्वपुत्रपौत्राणां कम्प्यूटरक्रीडां दृष्ट्वा आह्लादिताश्च भवन्ति। ते कथयन्ति मित्राणि यत् तेषां सुतोऽपि नवीनेन संसारेण सह धावति। प्रसन्ना वदन्ति यत् तेषां सुतोऽपि मोबाइलयन्त्रेण चित्रं (फोटो) कर्षति। परन्तु ते न जानन्ति यन्नायं विकासोऽपितु विनाशो बाधकश्च। विशेषज्ञाः स्वीकुर्वन्ति (कम्प्यूटरस्य) संगणकस्यात्यधिकप्रयोगेण बालकेषु संवादहीनता स्वभावे दुष्टता च वर्धते। मनोवैज्ञानिकाः स्वीकुर्वन्ति यदेतेन बालकानां स्वाभाविक-विकासोऽवरुद्धो भवति।

एकोऽभिभावकः कथयति-अस्माकं पुत्रो विद्याल-यादागमनसमकालमेव (कम्प्यूटरे) संगणके समुपविशति। आहूतोऽपि नायाति नोत्तरं ददाति न च भ्रमणाय गच्छति अतो वयं चिन्तिताः स्म। यदि एतादृशी एव स्थितिः स्थास्यति तदायं (पागल) विक्षिप्तो न भवेन्नाम। अपरः कश्चनाभिभावकः स्वसुतायाः व्यवहारेण चिन्तितो विद्यते। तस्या माता वदति सप्तमकक्षायामेवेदानीं सा परन्तु बालकोचिता चपला न विद्यते मितं भाषते। शेषः समयः संगणके व्यत्येति।

बालकाः संप्रति न क्रीडन्ति। क्रीडा कर्गदेषु विद्यते। अभिभावकाः स्वकार्यव्यस्ताः बालकानां कथनं न शृण्वन्ति। समयाभावात् न बालकैः सह क्रीडन्ति न च तेषां समस्यां शृण्वन्ति निवारयन्ति च। तेऽपि मोबाइलं तेभ्यो दत्वा निश्चिताः-भूत्वा स्वकीयकार्येषु व्यस्ताः संजायन्ते। ततश्च बालका अपि अहर्निशं मोबाइलं कर्णे स्थापयन्ति। समारोहेषु विवाहाद्युत्सवेषु बालका गन्तुमेव नेच्छन्ति यदि गच्छन्ति तदा तत्रापि कर्णे मोबाइलेन किमपि श्रोतुं संलग्ना एकाकिन एव तत्र भ्रमन्ति।

एवं सर्वे प्रतिवेदनं वर्णयन्ति यत् सम्प्रति बालका युवकाश्च मोबाइलमाध्यमेनाज्ञातां कामपि बालिकां प्रेयसीत्वेन चिन्वन्ति तया सह निवसन्ति संयोगादिकं चिरं सहवासेन कृतां तां परित्यजन्ति। पुनः कामप्य-न्यामामन्त्रयन्ति। बहवः अपशब्दैः व्यवहरन्ति। कस्याऽपि अश्लीलचित्राणि तस्याः समीपं प्रेषयित्वा तां कुत्रापि (होटले) रात्रिनिवासाय आमन्त्रयन्ति। इत्थं इन्टरनेटस्य दुरुपयोगेन समाजे विशेषतः बालकेषु युवकेषु च दुराचरणानि वर्धन्ते।

संप्रत्येव फ्रांसदेशस्य संसदा नियमरचनां विधाय प्राथमिकविद्यालयेषु माध्यमिकविद्यालयेषु च बालकेभ्यो मोबाइलस्य प्रयोगोऽवरोधितः। एष नियमः 2018 वर्षतः संधारितः संजातः। शैशवं रक्षितुं फ्रांसस्यास्य प्रयोगस्य प्रतिक्रिया भारतेऽपि संलक्षिता संजाता। मोबाइलस्य समधिकप्रयोगेण रोगा जायन्ते। नैके युवानोऽनेन रोगिणः समभवन्। अतः स्वास्थ्यसुधारकेन्द्रेषूपचाराय प्रवेशः आवश्यकः संजातः द्राक्तरैरुपचारद्वारैव पुनः स्वस्थाः संजायन्ते।

समये एवात्र नियन्त्रणं विधेयम्। अन्यथा समाजे विकृतिरायास्यति इंटरनेटडिक्सन डिजआईरस्य लक्षणं सर्वेषु नगरेषु बालकेषु युवकेषु च प्रादुर्भवन्ति। अतः शैशवं रक्षितुं बालकेभ्यो मोबाइलं मा यच्छन्तु।

अनूदितकाव्यपृषता:

# सप्तदश आध्यात्मिककाव्यानि

( गुर्जरभाषायां मूलकवयित्री सु.श्री. ज्योत्स्ना देसाई )

❑ अनुवादक : डॉ. हर्षदेवमाधव:

**( 1 ) अद्भुता अनुभूतय:**

त्वं मम हस्तं गृह्णासि ते हस्तेन
अपि च
एकत्वस्य अनुभूतिं कारयसि
तत: पश्चात्
लेखक: न लिखति, न लेखकोऽस्ति
तथापि लेखिन्या लिख्यते
तव
ईदृशी अद्भुता अनुभूती:
प्राप्य
अद्य पर्यन्तं
तृप्ताऽस्मि
त्वमसि
एतदेव मह्यं पर्याप्तम्।

**( 2 ) जीवशिवयो:**

अद्य
कीदृशं ह्यं मेलनमस्ति मनोहरम्!
मेलनमस्ति
तथापि नास्ति
ऐक्यम् एवास्ति
ऐक्येऽपि त्वमसि
अहं ब्रह्माऽस्मि।

**( 5 ) विरहानन्द:**

त्वां रोदयित्वा
त्वां हासयित्वा
त्वां प्रसाद्य
स
मां हर्षान्वितां करोति।
अत एव तं कथयामि
''त्वं विमुखो भव।
अहं त्वां प्रसादयिष्यामि।
किन्तु केवलमेकवारं
विमुख: कथं भविष्यसि?
विरहानन्देऽपि मम चित्ते परमानन्दोऽस्ति,
योऽपि सदैव आस्वाद्य:।
त्वमपि स्वानुभवेन जानासि खलु।''

**( 6 ) शून्ये स्वदर्शनम्**

शून्याकारे शून्या भूत्वा
शून्यतां विलोकयन्ती
अवगच्छन्ती -अनुभवन्ती
निकायं शून्यावस्थास्थायां
स्वात्मानं स्वात्मना
शून्यावेशे
वीक्ष्य
शून्ये विगलिताऽहम्।
शून्यताया:
शून्यतायाम्
अद्याहं
स्नाता खलु।

**( 9 ) मोहयन्ति मां**

मोहयन्ति मां
मम स्वजना:
अहं च
मायातन्तुभि: बद्धा।
तत: सहसैव ज्ञानं लब्धं यत्
प्रत्यणु असि त्वम्।
त्वमेव जनक :
त्वमेव सन्तति:
हे स्वरूप ! हे अरूप !
सर्वस्वरूपेषु त्वमेवासि।
केवलं त्वमेवासि।

**( 10 ) किमपि नास्ति**

किमपि नासीत् - किमपि नास्ति
किञ्चिदपि नास्ति

सत्यम् एव वदामि
कश्चिदपि नास्ति अपि च
कश्चिदपि न भविष्यति।
यदा मया समग्रं त्यक्तं तदा
मया सत्यं ज्ञातम्।
त्वमेव सर्वमसि
यदा-तदा परेषु-स्वेषु
सर्वरूपेषु-अरूपेषु-रूपे रूपे
त्वमेवासि केवलं
तव परमार्थस्वरूपे।

**( 13 ) कस्मात् अभिव्यक्तं कुर्याम् ?**

(1) अदृश्यसहचरसदृशे
त्वयि कस्मात् प्रणयं कुर्याम्?
कथं नु कुर्याम्?
केनोपायेन स्निह्येयम् ?
कथं नु त्वामभिनन्दानि ?
कस्मात् कथं वा ऋणस्वीकारं करवाणि?
कथं त्वां प्राप्नुयाम्?
(2) केवलं स्वानुभूतिभिः
स्वात्मस्था भूत्वा स्वात्मन्येव
मया त्वं प्राप्तः।
किन्तु ईदृश्यस्ति अव्यक्ता दशा
मया त्वं यथा दृष्टः - यथा ज्ञातः
यथानुभूतः तथा।
(3) कथं नु त्वां व्यक्तं करवाणि भाषया ?
शब्दाः कथं नु त्वां व्यक्तं कर्तुं समर्थाः ?
अपि च कस्माद् वा त्वां व्यक्तं करोमि ?
(यदा अहमेव अनिर्वचनीयानन्दे लीना जाता।)

**( 16 ) स्वयमेव लज्जास्पदा जाता।**

शुद्धयो न वृद्धिं गताः।
किन्तु अशुद्धयः शतगुणा जाताः।
प्राप्तेः सम्पत्तौ न वृद्धिरभवत्।
चाञ्चल्यात् स्थैर्यमपि नागतम्।
महतेरधोगतेः मार्गे
शीघ्रमेव पतनम् अभवत्।
हे प्रभो !
तव शरणागतिं विहाय
अहम् अगन्तव्यं प्राप्तम्।
एतत् सत्यं त्वया ज्ञापितम् एकस्मिन् एव क्षणे।
बाहुपाशे मां नीत्वा त्वया
दूरीकृता सर्वदूरता।
अधुना सर्वमपि अन्तिके - स्वात्मनि
मम मोहावस्थया
स्वयमेव अहं लज्जास्पदा जाता।

**( 17 ) शिशुवत् तव वस्त्राञ्चलं गृहीत्वा...**

त्वं मया सह वर्तसे
इति तव सान्निध्याऽऽभासेनैव
मम आयुः समाप्तं
त्वया एव लेखितं सर्वम्।
मया लिखितम्।
त्वया ज्ञापितम्।
मया ज्ञातम्।
त्वया या या अनुभूतिः कारिता,
तत् तद् अनुभूतं मया।
मातृवस्त्राञ्चलं गृहीत्वा
चलन् बालक इव अहं
त्वयैव जीवनपर्यन्तं रक्षिता
अहं स्खलिता पतिता रुदिता व्याकुला जाता, विमुखी जाता
तथापि
त्वया प्रतिक्षणं सेविता।
समग्रेऽपि मे जीवने
त्वमेव मां
शिशुवत् स्कन्धमारोप्य
अचलः।
हे प्रभो !
तव उपकारमिमं
स्मृत्वा
नतमस्तकेन नमामि
त्वामेव नमामि।

**8, राजतिलक बंगलो, आबादनगर निकटे**
**बोपल, अहमदाबाद।**

# जयपुर राजवंशेतिहासः ''कच्छवंश महाकाव्यम्''

❑ महामहोपाध्याय देवर्षिकलानाथ शास्त्री

समेषामस्माकं सेव्या सेयं सुरभारती देवभाषेत्याख्यायते। एतस्याः ख्यातेः किमपि कारणान्तरं भवतु किन्तु मन्मते प्रमुखं कारणमिदमस्ति यदियं निर्जरा, अमरा च भाषा। सहस्राब्दीभ्योऽस्याः स्वरूपं तथैव संघटितं, भाषिक-कलेवरदृष्ट्या सेयमद्यापि तदेव स्वरूपं बिभर्ति यदुपनिषत्कालेऽभूत् पतञ्जलेः समयेऽभूत्, शङ्कराचार्यस्य समयेऽभूत्, जगन्नाथपण्डितराजस्य समयेऽभूदद्य चास्ति। भूमण्डलस्यान्यान्या भाषाः शताब्दीषु व्याकरणपरिवृत्तिवशाद् भाषिकव्यवहार-परिवर्तनवशाच्च स्वरूपं विपरिवर्तयन्ति, अबोध्याः सञ्जायन्ते यथा कतिपयशताब्दीपूर्वतनी ''चॉसर'' कविकालीना आंगलभाषाऽद्य नितरामबोध्या, हिन्दीभाषाऽपि खुसरोकालादारभ्याद्य सुतरां परिवृत्ता।

संस्कृतभाषाया निर्जरत्वस्यास्य किमपि कारणं भवतु, पाणिनीयव्याकरणस्य सततं सर्वमान्यता तत्र प्रामुख्यं बिभर्ति, ततश्चास्य निर्जरत्वस्यायं स्पष्टः प्रभावोऽस्ति यत्समस्तेऽपि विश्वे संस्कृतभाषा देशकाल-बन्धनमुक्ता संमान्यते, संस्कृते विलिखितं किमपि साहित्यं, किमपि वस्तुजातं, कोऽप्यभिलेखः, 'कालपात्रे' निहितमजरामरं वस्तु सम्पद्यते। अत एव सहस्राब्दीभ्यो भारतीयै राजवंशैः स्वकीय इतिहासोऽमरो निर्जरश्च भूयादिति कामयमानैः स्ववंशस्याभिलेख इतिहासश्च संस्कृतमहाकाव्येषु विलेखितः समर्थकवीनां लेखनीभिः। को न जानाति यत् कल्हणस्य राजतरङ्गिणी काश्मीराणामितिहासमजरामरं व्यधात्, बिल्हणस्य विक्रमाङ्कदेवचरितं चालुक्यराजवंशं निर्जरमकल्पयत्। अस्मिन्नेव क्रमे भारतस्य सर्वेष्वञ्चलेषु राजवंशानामितिहासाभिलेखनं संस्कृतमहाकाव्येष्वक्रियत महाकविभिः सहस्राब्दीभ्यः।

राजस्थानीयानां राजवंशानामितिहासोऽपि महाकाव्येष्वनेकेष्वद्य सुरक्षितः। मेवाडराजवंशस्येतिहासो ''राजप्रशस्ति'' नामके संस्कृतमहाकाव्ये न केवलमलेख्यत महाकविरणछोडभट्टेन, अपि तु शिलापट्टेष्वपि तदुत्कीर्णमस्ति महाकाव्यम्। ''अजितोदय'' ''अभयोदय'' प्रभृतिमहाकाव्येषु मारवाडराजवंशेतिहासः, ''सुर्जनचरित'' ''शत्रुशल्यचरित'' प्रभृतिषु च हाडौती (कोटा बूंदी) राजवंशेतिहासोऽभ्यलेख्यतेति विदन्त्येवेतिहासमर्मज्ञाः।

जयपुरराजवंशोऽपि (यो मूलतः ''आमेर'' ''आम्बेर'' राजवंशोऽभिधीयतेस्म) देशस्य सुदूरवर्तिभ्योऽञ्चलेभ्यो विद्वत्तल्लजानानाय्य स्वनगरे प्रतिष्ठाप्य तेषां प्रभूतसम्माननायै सुप्रथितोऽस्ति। एतस्मिन् क्रमे आम्बेरराजवंशस्येतिहासलेखनस्य सुदीर्घा काचन परम्परा प्राप्यते। अकबरकालीनेन यशस्विना राजाधिराजेन मानसिंहेन मानप्रकाशाख्यं काव्यं विलेखितमभूत् किन्तु यदवधि जयपुरनगरसंस्थापकेन, अश्वमेधयाजिना सवाईजयसिंहेन भारतविश्रुता महाकवय आनाय्य निवासिता जयपुरे, तदवधि जयपुर-राजवंशेतिहासकाव्यानामविच्छिन्ना काचन परम्परा प्रावहदस्मिन्नगरे। एवंविधानामितिहासकाव्यानां बृहत्त्रयी श्रीकृष्णभट्टकविकलानिधिकृतमीश्वरविलास-महाकाव्यमारभ्य सीतारामभट्ट पर्वणीकरकृत जयवंश-महाकाव्यं समावेशयन्ती ऊनविंशशताब्द्याः कविप्रवर-श्रीकृष्णरामभट्टकृत कच्छवंशमहाकाव्यपर्यन्तं सुप्रथिताऽस्ति। महाकाव्यत्रयेऽस्मिन् स्वयं राजप्रासादेषु सुरक्षितानीतिहासतथ्योद्घाटकानि वस्तूनि सुपरीक्ष्येतिहासः प्रणायितोऽभूद् राज्याधिकारिभिः स्वयं महाराजस्य

पर्यवेक्षणे, इति सुप्रसिद्धम्। एतदनन्तरं पं. सूर्यनारायणाचार्यप्रभृतिभिरपि स्वप्रेरणया ''मानवंशा'' दिकाव्यलेखनं प्रारभ्यतेति विंश्याः शताब्द्याः कथा। विंश्याः शताब्द्या प्रारम्भत एव जयपुरनगरसौन्दर्यवर्णनपराण्यपि काव्यानि प्राणीयन्त कविसार्वभौमैर्येषां श्रीकृष्णरामभट्टकृतं जयपुरविलासकाव्यं, हरिवल्लभकृतं जयनगरपञ्चरङ्गं भट्टश्रीमथुरानाथशास्त्रिकृतं जयपुरवैभवं च ब्रहत्त्रयीरूपेण चर्च्यते।''जयपुरवैभव''काव्यं तु राष्ट्रिय संस्कृतसंस्थानेन मञ्जुनाथग्रन्यावल्यां प्रकाशितमपि।

जयपुरेतिहासाभिलेखकेषु त्रिषु काव्येष्वेषु ईश्वरविलासकाव्यं, जयवंशमहाकाव्यं चेति काव्यद्वयं प्रकाशितचरम्। ''कच्छवंश'' महाकाव्यमधुनावध्यप्रकाशितमभूत् किन्त्वस्य यशोधवलिमा पूर्वत एव प्रसृतोऽभूद् देशे। एतस्य कारणमिदमासीद् यद्राजपरिवारानुरोधेन प्रणीतेषु काव्येष्विदं चरममासीत्, अर्वाचीनत्वान्नूतनमप्यासीत्, विशेषतस्तु श्रीकृष्णरामभट्टपादा येऽस्य काव्यस्य प्रणेतारोऽभूवन्, विलक्षणप्रतिभाशालिनः सर्वशास्त्रनदीष्णाः, आयुर्वेदशिखरस्थमनीषिणः, काव्यकलापारङ्गता रचयितारश्चाऽभूवन्। तेषां काव्यरचनाविच्छित्तिः, चमत्काराधायिका शैली, विविधभाषाभिज्ञत्वान्नूतनालङ्कृतिगर्भिता रचनाविशेषाश्च विद्वत्समाजे सुप्रथिता अभूवन्। अतस्तेषां लेखनीतो निर्गता काव्यधारा विलक्षणैव स्यादिति सर्वेषामभूत्प्रत्ययः। एते हि सं. 1905 वि. वर्षे जनिं लेभिरे, केवलं 49 वर्षाण्येव तेषामायुरभूत् किन्त्वस्मिन् संक्षिप्तेऽपि कालखण्डे तैः कालजयिनी काव्यरचना व्यधायि।

आम्बेरराजवंशस्य प्रारम्भत एवेतिहासोन्नयनं विधाय वर्तमानकालपर्यन्तं जयपुरेतिहासलेखनमभूत्तेषामुद्देश्यम्।ते हि सवाईमाधवसिंह (द्वितीय) समये लेखनरता अभूवन्। माधवसिंहस्यास्य, तत्पूर्वतनराजाधिराजस्य सवाईरामसिंह (द्वितीय) स्य च पूर्णमैतिहासिकं वर्णनं नाऽभून्निबद्धं पूर्वोल्लिखितेषु तत्पूर्ववर्तिषु काव्येष्विति कच्छवंशमहाकाव्येनैव जयपुरेतिहासः पूर्णतां नीत इत्याशयिका काव्यस्यास्य कीर्तिर्विंश्याः शताब्द्या आरम्भेऽनेकानि दशकानि यावत् प्रसरन्ती सर्वदैवाऽश्रूयत किन्तु नेदं प्राकाश्यत। अल्पीयस्येव वयसि कवेः स्वर्गारोहणवशाच्छीघ्रं प्रकाशनं न समभूत्। कवेः सङ्कल्पो विंशत्यधिकसर्गेषु काव्यलेखनस्याऽभूत् किन्तु न स पूर्णतां गत इत्यप्यश्रूयत तदा।

काव्यस्यास्य प्रकाशनप्रयासा गतायामर्धशताब्द्यां निरन्तरमभूवन्निति तथ्यस्यास्य स्वयमहं साक्षी। कदाचन राजस्थान संस्कृत अकादम्या, कदाचन स्वयं कवेः प्रपौत्रेण वैद्य-कविवर्येण श्रीदेवेन्द्रभट्टमहाभागेन, कदाचन प्रकाशनप्रवणैरन्यैश्चतुरचूडामणिभिरिदं सपद्येव प्रकाश्येतेति सूचना बहुधा प्राप्यन्त किन्तु नाभूदिदं प्रकाशितम्। प्रसङ्गविशेषेष्वेतस्योद्धरणानि कवेर्वंशजेभ्यः पाण्डुलिपेरंशानादाय बहुभिरितिहासकारैः, कविभिर्लेखकैरनुसन्धित्सुभिश्च प्राकाश्यन्तेति स्पष्टं स्मरामि किन्तु सम्पूर्णमिदं काव्यं नाऽभूत्सुलभमध्येतृणां कृते।

गतेषु वर्षेषु डॉ. रमाकान्त पाण्डेयस्य हिन्द्यनुवादेन टीकया च सह जयपुरीयकाव्यमिदं जगदीश पुस्तकालयेन प्रकाशितमस्तीति महान् प्रमोदः। एतस्य दिदृक्षा बहूनां बहोः कालादभूत्। काव्यस्यास्य बहवो विशेषा उल्लेखनीयाः। यथा मयोक्तं पूर्वम्, काव्यस्यास्य प्रणेतुर्विलक्षणा काव्यप्रणयनप्रतिभा कविसमाजे सर्वदा समादृताऽभूत्। अतः काव्यकलाचमत्कारास्त्वस्मिन् पदे पदे प्राप्यतेरन्नेव, इतिहासस्यानेके सन्दर्भा अपि नूत्नतया प्राप्येरन्। यद्यपि राजप्रासादस्थप्रमाणपूगमवेक्ष्य कविना तदिदमितिहासकाव्यं व्यलेख्यत, किन्तु बहुत्र कविसुलभकमनीयकल्पना प्रणयवशात्तादृशान्यपि वर्णनान्यत्र प्राप्येरन् यानि मानवसमाजे नाऽद्य सम्भवेयुः।

एतस्य प्रकटमेकमुदाहरणं जयपुरेतिहासविशेषज्ञेन राष्ट्रपतिसम्मानितेन शोधविदुषा स्व. श्रीगोपालनारायण बहुरामहाभागेन प्रसङ्गे एकस्मिन् प्रस्तुतमभूत्।

जयपुरनगरे पर्यटकानाकर्षयन्ती ''ईसरलाट'' इत्याख्या सरगासूली (स्वर्गशूली) नामिका सर्वोच्चा विजयस्तम्भनिर्मितिः जयसिंहसुतस्येश्वरीसिंहस्य विजयं सम्मानयितुं निरमाप्यतेति सर्वे जानन्ति। किन्तु कविवर्येण श्रीकृष्णरामभट्टेन कच्छवंशमहाकाव्यस्य त्रयोदशे सर्गे कविसुलभाऽकल्पनीयकल्पना सरगासूलीनिर्माण-कारणत्वेनोपनिबद्धा विस्माययेत् पाठकान्। कविर्वर्ण-यति यदीश्वरीसिंहो रसिकहृदयोऽभूत्। एको हरगोविन्द-नाटाणीत्याख्यः सामन्तोऽपि राजप्रासादस्य नातिदूरं निवसतिस्म, यस्य दुहिता सर्वाङ्गसुन्दर्यभूत्। तां महाराज ईश्वरीसिंहः कामयते स्म, अतस्तस्या अवलोकनाय, संलापादये च सोयमुच्चतरप्रासादो निरमाप्यत तेन। एकदा सर्वोच्चेऽस्मिन् शिखरे आरुह्य राज्ञा नायिकायाः सौन्दर्योपरि सुरुचिराऽऽर्याऽपि न्यबध्यत सा कविनोद्धृता।

स्पष्टमिदं यन्न कोऽपि राजा तादृशं कार्यं कुर्यात्, न च कश्चिदपि प्रासादमारुह्यैवं कस्याश्चन सुन्दर्याः कृते काव्यरचनामित्थं प्रोच्चारयेत्। निश्चितमेव सुललिता कविकल्पनैवेयं स्यात् ''चकमे हरगोविन्ददुहितारं प्रसह्य हा'' 201 इत्यारभ्य माधवेन्द्रेण निभृतं चक्रे सन्धिमिति श्रुतम्। 205 इत्युद्धरणं त्रयोदशे सर्गे द्रष्टुं शक्यम्। नेदमैतिहासिकं तथ्यम्, कविकल्पनैवेयं काव्ये लालित्याधानोद्देश्यकेति स्पष्टीकर्तुमेव महाकविना श्रीकृष्णरामभट्टेनात्रान्ते ''इति श्रुतम्'' इति पदद्वयं निवेश्य सङ्केतितं यन्नानेन काव्यस्याप्रामाणिकता राज्ञो वा मर्यादाहीनता निष्कृष्येतेति पाठका विदाङ्कुर्वन्तु।

विवरणस्यास्य तात्पर्यमिदमेव यत् कच्छवंशमहा-काव्ये राजप्रासादस्थराजकीयाभिलेखैः प्रमाणिता राज्येतिहाससामग्री, पूर्वप्रणीतेभ्य ऐतिहासिककाव्येभ्यः प्रेरणामादाय निबद्धान्यैतिहासिकविवरणानि तु सन्त्येव, सहैव कविवर्यस्यास्य नूतनप्रातिभोन्मेषोत्थाः काव्य-चमत्कारनिबन्धनोद्देश्यका ''मौलिक'' योजना अपि द्रष्टुं शक्यन्ते। श्रीकृष्णरामभट्टः कविवर्यो मूलतो गुर्जर-प्रान्तोत्थे ''भटमेवाड़ा'' ख्य विप्रवंशे जनिं लेभे। ऊनविंश्याः शताब्द्या अन्ते विंश्याः प्रारम्भे चाऽस्य यशोधवलिमा प्रससार समग्रेऽपि देशे। निर्णयसागर-मुद्रणालयस्तदानीं मुम्बईनगरे संस्कृतस्य सर्वोत्कृष्ट-मुद्रणकेन्द्रत्वेन प्रसिद्धोऽभूद् येन काव्यमालाख्यायां संस्कृतग्रन्थशृङ्खलायां शतशो नूतनसंस्कृतपुस्तकानि प्राकाश्यन्त, ''गुच्छक'' नाम्ना रचनासङ्ग्रहाः प्राका-श्यन्त। तेन मुद्रणालयेन स्वयमनुरुध्य श्रीकृष्णरामभट्टानां कृतयः प्राप्ताः प्रकाशिताश्च। काव्यमालाया अस्याः प्रशंसायां प्रणीतं ''काव्यमालाप्रशंसाकाव्यं'' तदानीमेव निर्णयसागर मुद्रणालयेन प्राकाश्यत। एतेषां सुविपुला ग्रन्थसामग्री, आयुर्वेदे, काव्यरचनायां च विश्रुतस्य पंडिताखण्डलस्य प्रसादरूपा भारतस्य विविधेभ्यः स्थानेभ्यः प्रकाशमाप।

श्रीकृष्णरामभट्टानां प्रपौत्रेण स्वयमायुर्वेदमनीषिणा पं. देवेन्द्रप्रसादभट्टेन कविकुलगुरूणामेषां जीवनवृत्तं रचनानां विपुला सामग्री च जयपुरात् प्रकाशिता कतिपय-दशकेभ्यः पूर्वं, किन्तु प्रथितयशस्कस्य कच्छवंशमहा-काव्याख्यस्य ग्रन्थस्य नाऽभूदवतारणा मुद्रितरूपेण। अतो ग्रन्थोऽयमिदम्प्रथमतया जयपुरात् प्रकाशितः। जयपुरेति-हास-प्रस्तोतृभिरितिहासग्रन्थैरन्यैः सह साम्प्रतमस्य तुलनात्मकविवेचनं शोधविद्वद्भिः करिष्यत इत्याशास्महे।

# विनायकसहस्रसिद्धयै

❑ राजेन्द्र मोहन शर्मा

**हिन्दीभाषाया उपन्यासोऽयं पूर्णरूपेण लेखकस्य कल्पनाप्रसूतः। नहि प्रमाणान्तरमपेक्षते। लेखकेन राजेन्द्रमोहनेन विनायकसम्बद्धानि पुराणानि अन्ये च ग्रन्था अधीताः। ततः स्वप्रतिभाजन्य-कल्पनयाऽयं कल्पितः। सम्पादकः**

विनायकः स्वकक्षे शीघ्रमभ्रमत्। तस्य-औत्कण्ठ्यं प्रकटयति पौनःपुन्येन द्वारं प्रति निरीक्षणत्वरा च यत् स कमपि प्रतीक्षते। विनायकः स्वस्य विशालकायस्कन्धौ किञ्चिदाकुञ्चयन् स्वयं स्वस्मिन् किञ्चिदस्पष्टं ब्रुवन् वार्तां प्रारभत।

नाद्यावधि-अहम्-अजानाम् यदेते जनाः मत्तः किमपेक्षन्ते। अहं स्वसहचरैः सह यदकुर्वम् नासीत् तत् किमपि आश्चर्यम्। मया स्वपितृदेशेऽपि सर्वमेतदाचरितम् परन्तु न जाने एते मां किमवगच्छन्ति ?

तदैव कक्षे मूषकः प्राविशत्। कुत आगच्छसि त्वम्? विनायकः अपृच्छत्? मन्ये मूषको नाशृणोत्। त्वं कियत् कालपूर्वकं सन्नद्धो भवेति मया कथितम्। पूर्वं मां प्रतिबोधय एते मत्तः कि वाञ्छन्ति? विनायको मूषकमेवापृच्छत्।

परन्तु किमर्थम्? हसन् मूषकोऽवदत्-एते तवाभिनन्दनं कर्तुमिच्छन्ति। विनायकोऽपृच्छत्। मूषकोऽवदत्-तेषां परम्परा विद्यते। यदा कोऽपि एतेषां वनानां प्रान्तानां तत्रत्यानां जीवजन्तूनाम् उपकारं विदधाति तदा सरलस्वभावा एते तस्य स्वागतं वन्दनां च कुर्वन्ति। मूषकोऽकथयत् विनायक ! संभवतः त्वं स्मरसि यदा वयं प्रथमवारमस्मिन् पर्वतीयप्रदेशे समागतास्तदा एते एव कथमस्माभिः सह शत्रुवदाचरन्। यदि वयम् उच्चशिखरे नाभविष्याम तदा तु एतेषां विषाक्तैः शरैः पातिताः कस्यापि गभीरायाः कन्दरायाः गभीरेषु खातेषु विलुप्ता अभविष्याम।

आम् तत् तु समीचीनम्, तत्र किमाश्चर्यम्? अस्माकं प्रान्तेष्वपि यदि कश्चन-अपरिचितः अथवा अपरिचितानां समूहः समायाति सदा वयमप्यात्मरक्षायै तथैव सावधाना भवामः।

स्मरसि मूषक? विनायकोऽवदत् यदा वयं शिखरान्नीचैः उपत्यकायामागताः तदापि शतशः स्त्रीपुरुषाः समुत्सुकाः अस्माकं परितः समुपातिष्ठन् तदा श्रेष्ठमिदमाचरितं त्वया, सर्वप्रथमं सविनयमभिवादनं विधाय-आत्मनः परिचयः प्रदत्तः। कथितं च न वयं भवतो शत्रवः, वयं तु पथिकाः स्म। तदैवादिपुरुषाणां मुख्यः सम्मुखे समागत्य साग्रहमकथयत् पूर्वं स्वपरिचयं प्रयच्छन्तु भवन्तः। तदैव श्रीमन्तः अनेन मार्गेणाग्रे गन्तुं शक्ष्यन्ति। मूषक लक्षः त्वामुद्दिश्य इङ्गितवान्। लक्षः महता वेगेन गदां वायौ भ्रामयित्वा उच्चैरुच्छालयत् सा च भूमौ समागत्य स्तम्भवत् सरला प्रातिष्ठत्। आदिनायकेन सह सर्वो जनसमूहः लक्षस्य क्रियाकलापं दृष्ट्वा चकितोऽजायत। त्वं नायकम् इङ्गितवान् अवदच्चोत्थापय इमाम्।

नायकसहिताः सर्वे क्रमशः तां गदामुत्पाटयितुं प्रायतन्त परन्तु न साफल्यमलभन्त। आदिनायकोऽबि-भ्यत् तदा भवान् तस्य स्कन्धे हस्तं निधाय अवदत् मा बिभेहि। वयं भवतां सुहृदः स्म। अद्य रात्रिविश्रामम् अत्र

विधाय-अग्रे प्रस्थास्यामः। तदा मूषक! त्वया परिहासस्य पराकाष्ठा कृता तां गदां सारल्येनोत्थाप्य नायकस्य करे न्यधात्। चमत्कृतो नायकः गदां परितः परावृत्यापश्यत्। सर्वे स्त्रीपुरुषाः त्वया सह अहसन्। ततश्च भवान् तानाश्वासयत् नायं कश्चन चमत्कारः इदं तु लक्ष्यस्य विशेषाभ्यासजनितमेकं कार्यं विद्यते। अनेनाभ्यासेन पुरुषः स्वकीयां गदां शिलामध्ये तथा स्थापयति येन तत्र सा सुदृढा जायते। न पुनः कोऽपि तां चालयितुं शक्नोति। युष्माकं स्पष्टीकरणेनापि नायको न अतुष्यत्। ततः स उत्सुकोऽपृच्छत्- तदा भवान् कथं गदां निःसारयत्।

मूषक ! अहं सम्यक् स्मरामि यद् भवान् पूर्वं वक्रदृष्ट्या लक्ष्यम् अपश्यत्-मन्ये तदीयां स्वीकृति-मैच्छत्। तदा लक्ष्यो मन्दस्मितेन स्वीकृतिं प्रायच्छत्। तदा भवान् नायकाय तत् सर्वं ज्ञानं प्रायच्छत् येन गदा शिलाखण्डे स्थाप्यते, निःसार्यते, उत्क्षिप्यते च । भवतामनेन कार्येण अस्मभ्यं सा रात्रिः सुरक्षिता सुविधा-प्रदा चाजायत।

नायकः तदीयाः सहचराश्च सुन्दरं सुविधाप्रदं स्थानमस्मभ्यं प्रायच्छन्। तदैव मूषकः परिहासपूर्वक-मवदत्- आम् आवश्यकम् भवते तु स आस्तीर्णद्वयं संयोज्य सुखस्य पूर्णां व्यवस्थामरचयत्।

# सूक्ति-सुधा

❑ **डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः )**

**शोकं करोति यो मूढो मृतो न हि मरिष्यति।**
**शोभते स न चान्योऽत्र पुत्रदारादिसंसृतेः।।**

– जो मूढ़ शोक करता है, वह क्या पूर्व में कभी मरा नहीं और आगे कभी मरेगा नहीं। अतः पुत्र, स्त्री आदि की मृत्यु होने पर व अन्यत्र शोक शोभा नहीं देता।

**मृते स्वजनमात्रेऽपि यः शोकं कुरुते कुधीः।**
**आत्मानं किं स जानाति जरामरणविच्युतम्।।**

– जो कुबुद्धि आत्मीयजन की मृत्यु होने पर भी शोक करता है, वह क्या आपकी आत्मा को जरा-मरण से रहित जानता है?

**यस्मिन्नहनि संजातः तदारभ्य दिनं प्रति।।**
**नीयते यमगेहं हि प्राणी कर्मारिभिर्बलात्।।**

– निश्चय से जिस दिन यह प्राणी (जीव) उत्पन्न हुआ है, उसी दिन से (आरम्भ होकर) यह जीव कर्मरूपी शत्रुओं द्वारा बलपूर्वक यमराज के घर ले जाया जाता है।

**मूढः शोकाकुलो भूत्वा धर्मपूजादिकं त्यजेत्।**
**बुधः इष्टवियोगेन संवेगाद् धर्ममाचरेत्।।**

– मूर्ख मनुष्य शोक से व्याकुल होकर धर्म-पूजादि को छोड़ देता है, जबकि बुद्धिमान् पुरुष इष्ट (प्रिय) वियोग से भी भावपूर्वक धर्माचरण करता है।

**कुगतिगमनमार्गं दुःखसंताप हेतुं,**
**स्वजनधनवियोगात् संभवं पापबीजम्।**
**विबुधजनविनिन्द्यं सौख्यकक्षानलं भो,**
**त्यज कुरु जिनधर्मं त्वं सदा सर्वशोकम्।।**

– परिवार और धनादिक के वियोग से उत्पन्न शोक कुगति का मार्ग है, दुःख व संताप का कारण है, पाप का बीज है, विद्वानों से निन्दनीय है, सुख रूपी कक्ष को अग्निरूप है, अतः हे भाई, ऐसे समस्त शोक को सदा के लिये छोड़ और जिन (श्रेष्ठ) (आत्म) धर्म को धारण कर।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

# ऋग्विधाने मन्त्रसाधनम्

❑ दीपक पालीवाल

निखिलब्रह्माण्डाधारभूतस्याखण्डाकाराकारितनित्यशुद्धबुद्धपरब्रह्मपरमात्मनः परमेश्वरस्य श्वासोच्छ्वासभूताः ऋग्यजुस्सामाथर्ववेदाः। समस्ते जगति यत्किञ्चिदस्ति पुराणात् प्रारभ्य साहित्यसङ्गीतकलापर्यन्तं तेषामाधारभूतस्स्तम्भः वेदवृक्षः एवाऽस्ति। तथा च यान्यन्यानि खगोलशास्त्राण्याधुनिकविज्ञानादीनि सन्ति तान्यप्यस्मात् वेदवृक्षादेव पल्लवितानि पुष्पितानि च। तत्र वेदाः मन्त्रात्मकाः। वेदविद्यया यत्किमपि कर्तुं वयम् इच्छामस्तत् मन्त्रमाध्यमेनैव साधयितुं शक्नुमः। परञ्च सामान्यजनेभ्यः कृते मन्त्रास्तेषाम् अर्थप्रयोगाश्च रहस्यात्मका एव। मन्त्राणां मन्त्रार्थानां च दुरूहतां विज्ञाय आचार्यशौनकः ऋग्वेदाधारितं ऋग्विधानं नाम ग्रन्थं प्रणिनाय। यस्याध्ययनेन मनुष्याः मन्त्रान् विदित्वा स्वस्य जगतश्च कल्याणं कर्तुमर्हन्ति। मन्त्राः कथं सिध्यन्ति? कथञ्च स्वाभीप्सितं प्रयच्छन्ति? कथञ्च तेषां साधनं भवति? एतान् एव विषयान् वय मत्र ज्ञास्यामः।

अणुपरमाणूनां, धातूनां, तत्त्वानां, रसायनादीनां च एका नियता सुव्यवस्थिता च प्रक्रिया भवति, यया एतानि तत्त्वानि सिद्धतामायान्ति, ततः परम् अस्मत् साधनानि भूत्वा अभीष्टसाध्यं प्रयच्छन्ति। ननु लौकिकसाध्यसाधने सति अनया लौकिकया कार्यप्रणाल्या कार्यसिद्धिर्भवत्येव किं पुनरलौकिके वा लौकिके साध्यसाधने सत्यपि अलौकिकमन्त्रस्वरूपात्मकेन वेदेनापि अनेनैव विधिना कार्यं भवत्युत वा अन्यया एव प्रणाल्या कार्यसिद्धिर्भवतीति विचारणीयोऽयं विषयः।

यदि वेदाङ्गभूतानां गृह्यश्रौतधर्मसूत्राणां तथा च आश्वलायनगृह्यकारिकाऋग्विधानसामविधानेत्येतादृशानां ग्रन्थानाम् अध्ययनं कुर्मश्चेत् पश्यामः यदेषां मन्त्राणां कार्यप्रणाली लौकिकरसायनादि साधनसाधनात् भिन्ना उपमातीता अलौकिका च। यथा लोके दूरस्थजनेन सह वार्तालापाय दूरभाषयन्त्रस्य आवश्यकता, वैद्युतीयपत्रप्रेषणाय अन्तर्जालपुटस्य (Internet) आवश्यकता, चलचित्रयन्त्रचालनाय विद्युतः आवश्यकता भवति मन्त्रविधौ तथा न भवति। एकवारमन्त्रे सिद्धे सति यथेष्टं फलं ध्यानमात्रेणैव प्रयच्छति। श्रीसायाणाचार्योऽपि ऋग्भाष्ये आह-

**''पुरश्चरणाद्यनुष्ठानेन सिद्धमन्त्रत्वाद्यत्यत्फलमुद्दिश्य मन्त्राः प्रयुज्यन्ते तत्तत्फलं तथैव सम्पद्यते इति।''**[1]

अमुमेवाभिप्रायं शौनकाचार्याः प्रमाणयन्ति-

**''सिद्धा मन्त्रा विधिना ब्राह्मणस्य फलं यच्छन्ति विधिवत्प्रयुक्ताः''**[2]

प्रत्येकोऽपि मन्त्रः सप्रयोजनः। उक्तञ्च -

**''ऋषिभिर्विविधा मन्त्रा दृष्टा दृष्टप्रयोजनाः।''**[3]

प्रत्येकस्य मन्त्रस्य पृथग्विधानम् अस्ति। बहुत्र सम्पूर्णस्य सूक्तस्य प्रयोगोऽपि दृश्यते क्वचित्तु दशाधिकसूक्तानामपि एकत्रैव विधानं भवति। ऋषिभिः सप्रयोजनैर्ये मन्त्राः दृष्टाः नाध्ययनार्थयैव केवलमेते। जपतपपुरश्चरणादिभिः तेषां साधनद्वारा या फलप्राप्तिर्भवति सा सत्या एव यतोऽहि मन्त्रास्सत्यास्तेषां साधनञ्चापि सर्वथा सत्यमेव। अमुमेवार्थम् उपस्थापयन्ति शौनकाचार्याः-

**''सत्यं तेषां साधनं संयमश्च शमस्तितिक्षानसूया दमश्च।''**[4]

श्लोकांशस्यास्य भाष्यम् आचार्यवरेण मातृसूनुना महता गभीरतया कृतम्। तद्यथा- ''सत्यं वदनं चैषां साधनमिन्द्रियश्च शमः साधुष्वद्विषतां आर्जवन्तितिक्षाऽपकारिणोऽप्युपरिक्षान्तिशीलता अनसूयाश्च अपैशुन्यता दमश्च शुभकर्मस्वनुद्विग्रता अशुभकर्मसु निवृत्ति इति मन्त्राणां साधनानि।''[5]

एते नियमाः विशेषेण परिपालनीयाः तदा एव मन्त्रसिद्धेः मार्गः प्रशस्तो भवति। एते सर्वे शमादिषट्काः तपोभूता एव। एषाम् आचरणं तपोवत् भवति। अतः वक्तुं शक्यते तपोयुक्तस्यैव मन्त्राः सिद्धाः भवन्ति। विद्वेषण-संवननविषघ्नरोगनाशनमित्यादीनि नानार्थानि कर्माणि तेषु यमर्थमधिकृत्य ऋषयः यां देवतां स्तुवन्ति सा देवता अभिप्रेतं फलं प्रयच्छतीतिप्रकारकं वर्णनम् अत्रास्ति ऋग्विधाने।

इदानीं मन्त्रसाधनविधीनां मन्त्रप्रयोगाणां च सूक्ष्मावलोकनं कुर्मः। आदौ मनसा वाचा कर्मणा च पूतं कर्म भवेत्। तस्य कृते पञ्चगव्यप्राशनं हेमाद्रिकृतस्नानं, प्रायश्चित्तविधानं च करणीयम्। ततः गायत्रीजपपूर्वकं देवमनुस्मरेत्, अनन्तरं पुरश्चरणप्राजापत्यकृच्छ्रातिकृच्छ्र-तप्तकृच्छ्र-सान्तपनकृच्छ्र-पराककृच्छ्रचान्द्रायणशिशु-चान्द्रायण-महाचान्द्रायणादीनि व्रतानि आचरणीयानि भवन्ति। प्रत्येकस्य व्रतस्य पृथग्विधानं पृथगेव फल-ञ्चास्ति। एतेषां व्रतानां न केवलमेकैवावृत्या सकलं लभते। ऋग्विधाने व्रतानाम् आवृत्तेः अपि फलं पृथिग्निर्दिष्टम्। प्रत्येकस्य व्रतस्य आचरणविधिः महता विस्तरेण प्रपञ्चितः। इदानीं संक्षेपेण सारभूतश्लोकान् पश्यामः। "**केशश्मश्रु लोमनख**"[6] इत्यतः प्रारभ्य "**हुत्वाग्निं तर्पयेद्विप्रान्**"[7] इति श्लोकपर्यन्तप्राजापत्य-कृच्छ्रविधिर्वर्णितः। सामान्येन दिवारात्री भेदेन किञ्चिदानुपूर्व्येण अनुलोमविलोमेन, पृथग्द्रव्यग्रहणेनापि व्रतभेदो जायते।

अमुमेवाभिप्रायं शौनकाचार्याः प्रमाणयन्ति -

**कृच्छ्राणामेव सर्वेषां विधिरुक्तोऽनुपूर्वशः।**
**प्राजापत्यातिकृच्छ्रस्य तथा सान्तपनस्य च।।**[8]
**पराकस्य च कृच्छ्रस्य विधिश्चान्द्रायणस्य च।**
**एकेन शुद्धिमाप्नोति द्वाभ्यां पापैः प्रमुच्यते।।**[9]
**त्रिभिः सिध्यन्ति मन्त्राश्च मुच्यते चोपपातकैः।**
**चतुर्भिर्भ्रूणहत्यायास्तथैवायाज्ययाजनात्।।**[10]
**पञ्चभिः पातकैः सर्वैर्दुष्कृतैश्च प्रमुच्यते।**
**तप्तकृच्छ्रेण सर्वाणि पापानि प्रतिबाधते।।**[11]
**चान्द्रायणसहाद्यन्तमेभिः कृच्छ्रैः समं स्मृतम्।**
**त्रिभिश्चान्द्रायणैः पूतो ब्रह्मलोकं समश्नुते।।**[12]
**अष्टाभिर्देवताः साक्षात्पश्येत वरदास्तथा।**
**छन्दांसि दर्शभिर्ज्ञात्वा सर्वान्कामान्समश्नुते।।**[13]

एवं प्रकारेणोक्तेषु व्रतेषु आचरितेषु सत्सु कायशोधनं भवति। तैरेव कायः शोधितः सन् कर्माणि कुर्यात् इष्टान्कामानवाप्नोति। एवञ्च वेदपाठात् पूर्वं स्नानं ततः ब्रह्मदैवभूतपितृमनुष्याः पञ्चमहायज्ञाः अनुष्ठीयन्ते। तिस्रो व्याहृतिपूर्वकम् ओङ्कारयुक्तस्य सावित्रीऋचः जपमपि कुर्यात् तदनन्तरं निर्दिष्टे मासनक्षत्रे काले वा स्वानूकूल-स्वेष्टं कार्यं साधयितुं विशिष्टाः ऋचः पठेत्। निर्दिष्टसंहितापाठफलम् -

**अनश्नन्संहितामेतां प्रातः प्रातर्दिने - दिने।**
**आयुर्विद्यां धनं पुत्रान् ग्रहाँश्चाप्नोत्यनामयान्।।**[14]

कर्मणामादौ सावित्रीजपफलम्-

**आदावेव तु सावित्र्या कर्म कुर्वीत शान्तये।**
**पुष्टये धनलाभाय पशुलाभाय भूतये।।**[15]

प्रथमसूक्तस्य मन्त्राणां साधनविधिः -

**ऋग्वेदाद्यस्य सूक्तस्य विधिं वक्ष्याम्यतः परम्।**
**यथा ऋषिर्मधुच्छन्दाः कर्मैतेनाकरोत् पुरा।।**[16]

प्रतिदिनं संवत्सरं यावत् सूक्तपाठं कृत्वा चतुर्थप्राणाग्निहोत्रकाले शिरसा अग्निं धारयेत्। चतुर्थप्राणकालीयो हुतशेषं यद्धविर्भवति तस्य भक्षणं कर्त्तव्यम्। अनन्तरं प्राणाग्निहोत्रं जुह्वन् आग्नेयसूक्तेन **(अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्....**[17]**)** भोजनकाले आग्नेयं चरुं निर्वपेत्। संवत्सरं यावदेवमीदृशं कर्म करोति चेत् अग्निः सिध्यति सिद्धश्च सन् ध्यानमात्रेण कुत्रापि ज्वलति। यदि इच्छेत् तर्हि खलान् अपि दहत्येव न केवलं भूमौ अपितु उदकप्रदेशेऽपि

ध्यानमात्रेण अग्निर्ज्वलति। सिद्धोऽ-यमग्निर्न केवलं ज्वलत्येव अपितु इष्टान् कामान् अपि ददातीति स्पष्टरूपेण उल्लिखितमस्ति, ऋग्विधाने। इत्थं प्रकारेण अनेकेषां मन्त्राणां विधानं उपदिष्टम्। विधानस्यास्य अध्ययनेन मनुष्यास्समेषां कल्याणं कर्तुमर्हन्ति। परञ्च एवमेव यः कोऽपि साधयितुं न शक्नोति। ये छलरहिताः सत्यमनस्काः शान्ताः दान्ताः एव सत्यमन्त्राः भवितुं शक्यन्ते ततः ते वेदकृपया अवितथमन्त्रसामर्थ्योपेताः भूत्वा स्वस्य जगतश्च कल्याणं कुर्युरलं विस्तरेणेति शम्।

**टिप्पणी** –

1. ऋग्भाष्य प्र. मण्डल द्वि. अध्याय 1/2, 2. ऋग्विधान अध्याय 1 श्लोक 7, 3. ऋग्विधान अध्याय 1 श्लोक 3, 4. ऋग्विधान अध्याय 1 श्लोक 7, 5. ऋग्विधान आ. मातृसुनू अध्याय 1 श्लोक 7, 6. ऋग्विधान अध्याय 1 श्लोक 14, 7. ऋग्विधान अध्याय 1 श्लोक 26, 8. ऋग्विधान अध्याय 1 श्लोक 27, 9. ऋग्विधान अध्याय 1 श्लोक 28, 10. ऋग्विधान अध्याय 1 श्लोक 29, 11. ऋग्विधान अध्याय 1 श्लोक 30, 12. ऋग्विधान अध्याय 1 श्लोक 31, 13. ऋग्विधान अध्याय 1 श्लोक 32, 14. ऋग्विधान अध्याय 1 श्लोक 69, 15. ऋग्विधान अध्याय 1 श्लोक 72, 16. ऋग्विधान अध्याय 1 श्लोक 79, 17. ऋग्वेदसंहिता/ मण्डल 1 सूक्तम् 1

**शिक्षाशास्त्री, प्रथम वर्ष,**
**श्रीरामजीलालस्मृति शिक्षा महाविद्यालय,**
**पंवालिया, सांगानेर, जयपुर।**

# निर्भीकं कुरु मतदानम्

❑ **बुद्धिप्रकाशजांगिड़ः**

**लोकतंत्रीयपर्वणि, निर्वाचनेऽवधीयताम्।**
**निष्पक्षभावमनसा, मतदानं विधीयताम्।।**
**नेतुं देशमिमं सदोन्नतिपथं, प्राप्तुं परं वैभवम्**
**निष्ठा स्यात् मतदानकर्तुमनघा, देशाय नेत्रे नहि।**
**आवर्ते प्रतिपञ्चवर्षपरिधौ, निर्वाचनं जायते**
**सर्वेषां स्वमतं भवेद्धितकरं राष्ट्रोपकर्तृनृणाम्।।**
**नेता स्वार्थी भवति सुरतो राज्यमेव प्रणष्टम्**
**नेता स्वार्थाद् भवति विरतो जायते चेत्सुराज्यम्।**
**नेतुश्शीलं भवति सततं लोकतंत्रे हिताय**
**नेतॄणां वै प्रकुरु चयनं सर्वदा त्वं समीक्ष्य।।**
**बन्धो मे प्रिय सावधानमनसा मित्र क्षणं श्रूयताम्**
**त्वां वै लोभयितुं हि नेतृनिकराः यत्नानशेषान्ननु।**
**कुर्वन्तीति भवान् मुदाऽचलमनाः, नूनं वचो धार्यताम्,**
**राष्ट्रार्थं मनुते स्वजीवनमसौ, तस्मै मतं दीयताम्।।**
**मर्यादामभिरक्षतीह निखिलां, नेता परां सात्विकीम्**
**धर्मं मानवधर्ममेव मनुते, निःस्वार्थभावात्मकम्।**
**विज्ञः कर्मरतो जनोपकरणे, सेवापरश्चिंतकः**
**तस्माद्देहि मतं सदा सुमतये, प्रत्याशिने धर्मिणे।।**
**ब्रह्मा विष्णुशिवौ च सृष्टिरचने, सर्वप्रधानाः यथा,**
**तद्वत्सर्वजनाय चापि सकला, शक्तिर्मताधायिका।**
**कर्तुं या परिवर्तनं हि बलिनी वै लोकतंत्रे भृशम्**
**तस्मान्मा कुरु तावकीनमतुलं व्यर्थं विमूढे मतम्।।**
**मतं मतं ह्यमोघशस्त्रमेव लोकतंत्रके,**
**प्रयोजयेन्मतं भवान् सदैव राष्ट्ररक्षणे।**
**तथाविधं चिनोतु राष्ट्ररक्षिनायकं सदा,**
**यदीयशासने भवेद्ध भारतं प्रभारतम्।।**
**नव्यं भारतमेव नव्यविधिना, स्रष्टुं युगे नागरैः,**
**मन्तव्यं मनुजैः मुदा मनसिजं, मूल्यं मतस्यात्मना।**
**देशो दिक्षु दधातु वैभवमतो, दिव्यं परं दैवतम्,**
**तेषां धन्यमतं सदा मतिमतां, सदाष्ट्रभावात्मकम्।।**

**प्रशिक्षितस्नातकशिक्षकः ( संस्कृतस्य )**
**केन्द्रीयविद्यालय, केलांगः, लाहोलस्पीतिः,**
**हिमाचलप्रदेशः**

# को विशेषो रसालङ्कारयोः

❑ गजेन्द्रकुमारः कांसोटिया

रसतत्त्वं काव्यस्य प्राणभूतं वर्तते। शब्दार्थौ च तद् व्यङ्क्तः। सच काव्यवाक्यस्य वाच्यार्थो न भूत्वा व्यंग्यार्थो भवति। स अलङ्कार्यो भवति अतः अलङ्कार इति नैव वक्तुं शक्यते। यतो हि अलङ्कारः स भवति यः कस्यापि वस्तुनः सौन्दर्यं वर्धयति। अर्थात् अलङ्कारः शोभातिशायी तु भवितुम् अर्हति किन्तु सौन्दर्यस्योत्पादकत्वं नास्ति तदायत्तम्। काव्ये च रसस्योपस्थितिरनिवार्यरूपेण स्यादित्यावश्यकम्। किन्तु अलङ्कारः स्यादेवेति आवश्यकं नास्ति अपि च, अलङ्कारः शब्दार्थयोरुपकारकतया काव्यप्राणभूतस्य रसस्यैवोपस्कारको भवति तथैव यथा हारादयोऽलङ्काराः शरीरसौन्दर्यं वर्धयित्वाऽऽत्मनोऽपि सौन्दर्यं वर्धयन्ति। उक्तं च-

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।।**[1]

कदाचित् रसोऽप्यलङ्कारो भवितुमर्हति किन्तु सः अलङ्कारस्तदैव भवितुमर्हति यदा सः प्रधानः न स्यात् अपितु कस्याप्यन्यस्य रसादेरङ्गभूतो भवेत्। यत्र कश्चिदेको रसो रसान्तरस्य उपस्कारकोऽथवाऽङ्गभूतो भूत्वा स्थितः स्यात् तत्र सः अलङ्कार्यो न भवितुं शक्नोति। यतो हि अलङ्कार्यस्तु तदानीं रसान्तरो भविष्यति। अस्यां स्थितौ सः अलङ्कार इति वक्तुं शक्यते। अतएव ध्वनिवादिभिस्तादृशस्थले रसवदलङ्कारः स्वीक्रियते। यत्र रसः कश्चिद्रसान्तरस्याङ्गभूतो भवति तत्रापराङ्गगुणीभूतव्यंग्यस्यापि स्थितिः स्वीकृता।[2]

अलङ्कारवादिन आचार्या ध्वनिवादिनां मतेन सहमता न सन्ति। पुनरपि इदं तु स्पष्टमेव यत् काव्यस्य प्राणरूपेण रसं प्रतिष्ठाप्य अलङ्कार्यालङ्कारयोर्भेदकत्वं सर्वप्रथमम् आचार्य-आनन्दवर्धनेनैव ध्वन्यालोके प्रतिपादितम्। अपि च रसालङ्कारयोः पार्थक्यं संसाधितम्। ध्वनिवाद्यपेक्षया प्राचीना आलंकारिकास्तु रसस्य महत्त्वं केवलं दृश्यकाव्ये एव स्वीकुर्वन्ति स्म। तथा हि नाट्याचार्येण भरतेनापि नाट्ये एव रसस्य महत्ता प्रतिपादिता आसीत्।[3] तदारभ्य बहुकालं यावत् श्रव्यकाव्ये उपमाद्यलङ्काराणामेव प्राधान्यमतिष्ठत्।

भामह-दण्डि-उद्भट-रुद्रटप्रभृतिभिराचार्यैरलङ्कारवादिभिः श्रव्यकाव्येऽलङ्कारस्यैव महत्त्वं प्रतिपादितम्। गुणालङ्काररहितं काव्यं तेषां मते त्वकाव्यमेव। यथोक्तम्-

**''गुणालङ्काररहिता विधवेव सरस्वती।।''**[4]

तन्मते सौन्दर्यातिशयसम्पन्नमपि रमण्याः शरीरं यथालङ्कारं विना नैव शोभते तथैव काव्यमपि अलङ्कारहीनं नैव शोभते-

**''न कान्तमपि निर्भूषं विभाति वनिताननम्।''**[5]

उपमाद्यलङ्कारानिव रसमपि अलङ्कारं मत्वा तैरिदमुक्तम्। भामह-दण्डि-उद्भटैस्तु रसवत्प्रेयऊर्जस्विसमाहिताद्यलङ्कारैः रसभावाद्यलङ्कार्याणामपि समावेशोऽर्थालङ्कारेषु एव कृतमासीत्। यद्यपि भामहादिप्रतिपादितानां मतानां खण्डनं कृत्वा आचार्य आनन्दवर्धनः रसस्य महत्त्वं प्रतिष्ठापितवान् तथापि कतिपये आचार्या आलङ्कारिका भामहादिप्रतिपादितं मतमेवोचितममन्यन्त। यथा वाग्भटाचार्यो रसमलङ्कारमेव स्वीकरोति।[6]

कैश्चिन्नव्यैरालंकारिकैस्तु ध्वनिवादिभिरुक्तोऽलङ्कार्यालङ्कारयोर्भेदस्तु स्वीकृतः। किन्तु अलङ्काराः

काव्ये अनिवार्या न भवन्तीति मतं तेषां कृते असह्यवज्रपातसदृशमस्ति। चन्द्रालोकस्य कर्त्ता आचार्यो जयदेवः मम्मटस्य काव्यलक्षणे उक्तं 'अनलङ्कृती पुनः क्वापि'[7] इत्यंशं खण्डयति प्राबल्येन वक्ति च अलङ्काराः काव्यस्यानिवार्यधर्मास्तथैव सन्ति यथा उष्णत्वादयो-ऽग्नेर्धर्माः। यदि उष्णत्वं विनाऽग्नेरस्तित्वं भवितुं शक्नुयात् तर्हि अलङ्कारान् विनापि काव्यं भवितुं शक्नुयात्-

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।**
**असौ न मन्यते कस्मादनुष्णमनलं कृती।।**[8]

अत्रेदमपि विज्ञातव्यमस्ति यत् काव्यप्राणभूतस्य रसस्य तदुपस्कारकाणां च गुणालङ्कारादीनां मिथः सम्बन्धविषयेऽपि आलङ्कारिकेषु पर्याप्तं मतभेदाः सन्ति। अलङ्कारवादिनः प्रायेण उद्भटस्यैव मतं स्वीकुर्वन्ति यत् गुणालङ्काराः काव्यस्य अथवा काव्यप्राणभूतस्य रसस्य नियतधर्माः सन्ति। तन्मते काव्ये यथा गुणानां तथा अलङ्काराणामपि अनिवार्यता रसोत्कर्षाय काव्योत्कर्षाय वा स्वीकार्या। किन्तु ध्वनिवादी आचार्यो मम्मटः यत्रेदम् उल्लिखति तत्रोद्भटमतमपि प्रस्तौति। यथा-

**''समवायवृत्त्या शौर्यादयः संयोगवृत्त्या च हारादयः इत्यस्तु गुणालङ्काराणां भेदः। ओजः प्रभृतीनामनुप्रासोपमादीनां चोभयेषां समवायवृत्त्या स्थितिरिति गड्डलिका प्रवाहेणैवैषां भेदः''**[9]

उद्भटाचार्यः संयोगवृत्याऽलङ्काराणां स्थितिरित्यस्य पक्षस्य खण्डनं करोति इति उक्तदर्शितेन उद्भटमतेनैव काव्यप्रकाशकारः स्वयं प्रतिपादयति अलङ्कारिकाणां पक्षम्। वामनाचार्यस्तु पृथगेव न्यायं तत्र कल्पते। अलङ्काराणामनित्यधर्मतां स्वीकुर्वाणो वामनः हेतु-विशेषान् तान् स्वीकरोति काव्यालङ्कारसूत्रवृत्तौ तन्मतमेवं प्राप्यते-

**''काव्यशोभायाः कर्त्तारो धर्मा गुणाः।**
**तदतिशयहेतवस्त्वलङ्काराः।।''**[10]

मम्मटाचार्यो वामनमतेनैव प्रभावितो भूत्वा गुणालङ्कारयोर्भेदकत्वं प्रतिपादितवान्। तत्र अलङ्काराणां वैशिष्ट्यं चापेक्षितमुन्मूलितम्। साहित्यदर्पणकारोऽपि तद्वदेव स्वाभिमतमुल्लिलेख गुणालङ्कारयोः सन्दर्भे। यथा-

**शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।**
**रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्।।**[11]

एषां विवेचनेनेदं सिद्ध्यति यद् अलङ्काराः केवलं शब्दार्थयोर्धर्माः सन्ति। तेषां काव्ये अनियतत्वं भवति। तेषां भूमिका सौन्दर्यसंवर्धनमात्र एव तिष्ठति। तन्माध्यमेन ते रसोपकारका भवितुमर्हन्ति। एवं च शब्दार्थयोः काव्यत्वपक्षस्य निर्वाहोऽलङ्कारैः सम्भवति। वस्तुतस्तु नियतं रसापेक्षाः काव्यगुणा एव भवन्ति न त्वलङ्काराः। अतः रसः अलङ्काराद्यपेक्षया काव्ये विशिष्टं स्थानं लभते।

1. काव्यप्रकाशः 8/2,
2. ध्वन्यालोकः उ.3/पृ.267-268,
3. भरतनाट्यशास्त्रम्-अ. 6/पृ. 681,
4. अग्निपुराणम्-343/12,
5. काव्यालङ्कारः (भामहः) 2/3,
6. काव्यानुशासनम्/पृ.17,
7. काव्यप्रकाशः 1/4,
8. चन्द्रालोकः - 1/8,
9. काव्यप्रकाशः 8/1 वृत्तिभागः/प. 246,
10. काव्यालङ्कारसूत्रवृत्ति- 3/1/1,2,
11. साहित्यदर्पणः - 10/1

**शोधच्छात्रः**
**राजस्थानविश्वविद्यालयः, जयपुरम् (राजस्थानम्)**

# काव्यस्यात्मा ध्वनिः

❑ पायल जैन

ध्वनिशब्दो बहुधा निरुच्यते। निर्वचनानुसारं चास्य बहवोऽर्था गृह्यन्ते पञ्चधा निर्वचनेन पञ्चापि ध्वनिसम्बद्धा अर्था गृह्यन्ते। तद्यथा- (१) ध्वनति यः स व्यञ्जकः शब्दो ध्वनिः (२) ध्वनति, ध्वनयति वा यः स व्यञ्जकोऽर्थः ध्वनिः (३) ध्वन्यते इति ध्वनिः। यद् ध्वन्यते इत्यनेन रसालङ्कारवस्तुरूपं व्यङ्ग्यार्थत्रयम् उपतिष्ठते। (४) ध्वन्यते अनेनेति ध्वनिः इत्यनेन व्यञ्जनादिशक्तीनां ग्रहणम्। (५) ध्वन्यतेऽस्मिन्निति ध्वनिः इत्यनेन व्यङ्ग्यार्थप्रधानं काव्यमपि सङ्गृह्यते। एवं ध्वनि-शब्देन व्यञ्जकशब्दस्य, व्यञ्जकार्थस्य, व्यङ्ग्यार्थस्य, व्यञ्जनाव्यापारस्य, व्यङ्ग्यप्रधान-काव्यस्य च ग्रहणं सञ्जायते।

ध्वनेः स्वरूपम्- काव्यप्रकाशे-

**''इदमुत्तमतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः।''**

**''वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्का-व्यमुत्तमम्''** इति साहित्यदर्पणेऽपि विश्वनाथाचार्यो लक्षयति।

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनी-कृतस्वार्थौ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।**

यत्र शब्दार्थौ स्वार्थं गौणरूपेणोपस्थाप्य व्यङ्ग्यमर्थम् अभिव्यञ्जयतः तदा ध्वनिः। तथाविधं काव्यं ध्वनिकाव्यं वा निगद्यते। शब्दार्थयोरेकस्य व्यंजकत्वे तदन्यस्य सहकारित्वं प्रतिपद्यते।

**''शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः।**
**एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता।''**

वाच्यार्थातिरिक्तः को ध्वनिः व्यङ्ग्योऽर्थो वेति जिज्ञासायां ध्वनिकारेण स्फुटीक्रियते यत् कामिनी-लावण्यमिव यत् प्रसिद्धावयवातिरिक्तम् अन्यदेव किञ्चित् प्रतीयते वाच्यातिरिक्तं व्यङ्ग्यरूपं स ध्वनिः।

**''प्रतीयमानं पुनरन्यदेव, वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्य-मिवाङ्गनासु।।''** (ध्वन्यालोके)

एतदाश्रित्यैव लावण्यलक्षणमपि प्रस्तूयते यत्-

**'मुक्ताफलेषुच्छायायास्तरलत्वमिवान्तरा।**
**संलक्ष्यते यदङ्गेषु तल्लावण्यमिहोच्यते।''**

इयं व्यङ्ग्यार्थबोधनक्षमतैव प्रतिभावैशिष्ट्येन महाकवीनां यशः प्रसारयति। व्यङ्ग्यार्थाभिव्यक्तिरेव महाकवित्वस्य निकषः। अतो ध्वनिकृतोच्यते।

**''सरस्वती स्वादु तदर्थवस्तु**
**निःष्यन्दमाना महतां कवीनाम्।**
**अलोकसामान्यमभिव्यनक्ति**
**परिस्फुरन्तं प्रतिभाविशेषम्।।''**

व्यङ्ग्यार्थस्य तथा वैशिष्ट्यं यथैष नीरसं सरसम् असुन्दरं सुन्दरम् अमधुरं मधुरं च जनयति। ध्वनि-सिद्धान्तस्य स्थापना व्याकरणं, विशेषतो भर्तृहरिकृतं वाक्यपदीयम् आश्रित्य वर्तते। वाक्यपदीये नादस्फोटयोः स्वरूपं निरूप्यते-

**''यः संयोगविभागाभ्यां करणैरुपजन्यते।**
**स स्फोटः शब्दजाः शब्दा ध्वन्योऽन्यैरुदाहृताः।।''**

(वाक्यपदीये)

तत्रोच्चारणावयवानां संयोगेन विभागेन यः च शब्द उत्पद्यते स स्फोटः शब्दजाः शब्दा ध्वनिशब्दवाच्याः घण्टानादादिषु अनुरणनरूपः शब्दो यथा तथैव शब्दजो व्यङ्ग्योऽर्थो ध्वनिरित्युच्यते। स्फोटनादयो व्यङ्ग्य-व्यञ्जकसम्बन्धो मन्यते, तथैव काव्येऽपि ध्वनेर्व्यञ्जकत्वं प्रतीयमानस्यार्थस्य च व्यङ्ग्यत्वं सिध्यति।

**''ग्रहणग्राह्ययोः सिद्धा योग्यता नियता यथा।**
**व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयाः।।''**

(वाक्यपदीये)

नादैराहितबीजायां बुद्धौ अन्त्यवर्णश्रवणेन समं शब्दस्य रूपमवधार्यते। ध्वनिरेव शब्दस्वरूपं प्रकाशयति।

**''नादैराहितबीजायामन्त्येन ध्वनिना सह।**
**आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते।।**

(वाक्यपदीये)

**''प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा।**
**ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते।।**

(वाक्यपदीये)

स्फोटव्यञ्जकाः वर्णाः ध्वनिनाम्ना व्यवह्रियते। एवं व्यञ्जकशब्दार्थयोः ध्वनित्वं सिध्यति। लोचनकृता अभिनवगुप्तेन ध्वनेः पञ्च अर्थाः कृताः। ध्वनिः वैयाकरणानां स्फोटसिद्धान्तानुसारेण प्रवर्तितः। अतएव आनन्दवर्धनाचार्येण मम्मटेन च अर्थः कृतः वैयाकरण-प्रशंसायाम् उच्यते-

''बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्ज-कस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः।''
(काव्यप्रकाशः)

'प्रथमे हि विद्वांसो वैयाकरणाः। व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति।' (ध्वन्यालोकः)

**ध्वनिरात्मा काव्यस्य** -

अभिधा-लक्षणा-व्यापारानन्तरं व्यञ्जनावृत्तिः स्वीक्रियते। व्यञ्जनायाः प्राधान्येन काव्ये कल्पनाया-श्चिन्तनस्यानुभूत्यादितत्त्वानां च समावेशोऽभूत्। कल्पनाया अभावे लक्षणाया व्यञ्जनाया वा प्रवृत्तिर्न प्रसरति। नानुभूतिं विना भावावेशः भावावेशमन्तरेण न लक्षणा व्यञ्जना वोद्भवति। व्यञ्जनाशक्तिः काव्ये प्रभविष्णुतां रमणीयतां रागात्मकतां च सन्निवेशयति। तदैव काव्ये रमणीयत्वं जायते।

**'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः।'** (शिशु.) तादृशी रमणीयता काव्ये व्यञ्जनाशक्तेः प्रभावेणैव सञ्जायते। यथा रमणीशरीरे लावण्यम् मेघे विद्युत् चन्द्रमसि ज्योत्स्ना, उषसि ज्योतिर्वाऽन्तर्निहिता तथैव काव्ये ध्वनेरधिष्ठानम्। ध्वनितत्त्वं न काव्यस्यावयवरूपम् अपि तु अवयविरूपेण आत्मरूपेण वा प्रतितिष्ठति।

काव्यशास्त्रे अभिधा-लक्षणा, व्यञ्जना चेति तिस्रो वृत्तयः स्वीक्रियन्ते। अभिधा वाच्यार्थप्रधाना, लक्षणा लक्ष्यार्थप्रधाना, व्यञ्जना व्यङ्ग्यार्थप्रधाना च। व्यञ्जना-शक्तेः स्वीकरणे ये दोषा विविधैः शास्त्रज्ञैरुद्भाविताः ते दोषा आनन्दवर्धनेन ध्वन्यालोके मम्मटेन च काव्यप्रकाशे

निरस्ताः। उक्तं च-

**''यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते।**
**फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया।।**
**नाभिधा समयाभावात् हेत्वभावान्न लक्षणा।**
**विरतास्वभिधाद्यासु ययार्थो बोध्यते परः।**
**सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च।।**

(साहित्यदर्पणम्)

व्यञ्जना द्विविधा-शाब्दी आर्थी च। तत्र शाब्दी द्वेधा अभिधामूला, लक्षणामूला च। आर्थीव्यञ्जना च वक्तृ-बोद्धव्यादीनां वैशिष्ट्याद् अन्यमर्थं बोधयति।

ध्वनेर्भेदाः - ध्वनेर्मुख्यतया द्वौ भेदौ स्तः १. लक्षणामूलो ध्वनिः अविवक्षितवाच्यध्वनिर्वा २. अभिधामूलोध्वनिः विवक्षितान्यपरवाच्यध्वनिर्वा। लक्षणामूलध्वनौ वाच्यार्थस्य विवक्षा प्रयोजनं वा न भवति। व्यङ्ग्यार्थो लक्ष्यार्थम् आश्रित्यावतिष्ठते। अस्यापि द्वौ भेदौ-अर्थान्तरसंक्रमितवाच्यध्वनिः अत्यन्ततिरस्कृत-वाच्यध्वनिश्च। अर्थान्तरसंक्रमिते वाच्यार्थः स्वार्थं बोधयन्नपि अर्थान्तरं संक्रमति। अत्यन्ततिरस्कृते वाच्यध्वनौ च वाच्यार्थः सर्वथा तिरस्क्रियते लक्षणामूलश्चैष ध्वनिः।

अभिधा विवक्षितान्यपरवाच्ये ध्वनौ वा व्यङ्ग्यार्थो वाच्यार्थम् आश्रयते। अस्यापि द्वौ भेदौ-संलक्ष्यक्रम-व्यङ्ग्यध्वनिः असंलक्ष्यक्रमव्यङ्ग्यध्वनिश्च। संलग्क्ष्यक्रमव्यङ्ग्यध्वनौ व्यङ्ग्यार्थप्रकाशस्य पौर्वापर्यक्रमो लक्ष्यते। असंलक्ष्यक्रमव्यङ्ग्यध्वनौ सत्यपि पौर्वापर्ये क्रमे यौगपद्यात् न तत्र क्रमज्ञानम्। द्वयोरप्येतयोर्भेदयोरनेके भेदा वर्ण्यन्ते।

गुणीभूतव्यङ्ग्ये वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य नाधिकं महत्त्वम्। जगन्नाथमतेन गुणीभूतव्यङ्ग्यकाव्य-मपि उत्तमकाव्यान्तर्गतं स्वीकरणीयम् अस्य अगूढ-अपराङ्गव्यङ्ग्यादिभेदेन अष्टौ भेदाः।

**काव्यं त्रिविधिम्** -

मम्मटमतेन काव्यं त्रेधा विभज्यते। उत्तमं मध्यमम् अवरं (अधमं) चेति। व्यङ्ग्ये सति ध्वनिस्तकाव्य-मुत्तमम्। उत्तमकाव्यस्यापि भेदत्रयम्- रसध्वनिः, अलङ्कारध्वनिः, वस्तुध्वनिश्च। तत्र रसध्वनिः सर्वोत्तमः। गुणीभूतव्यङ्ग्यं काव्यं मध्यमम्। **'अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्।** अत्र व्यङ्ग्यार्थस्य सत्वेऽपि वाच्यार्थापेया तस्य गौणत्वं भवति। **शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्।'**

ध्वनिवादस्य महत्वस्य कारणं यदत्र सर्वेषामपि काव्यभूततत्त्वानां रसालङ्कार- वक्रोक्त्यादीनां समावेशो भवति। अत्र रीतिवादवद् न केवलं पाण्डित्यप्रदर्शनम् अपितु चित्ताह्लादकत्वं चेतोविकासकत्वं च भवति। ध्वनिवादस्य रमणीयत्वं शब्दमूलकम् अर्थमूलकं शब्दार्थोभयमूलकं च। ध्वनिः काव्ये ललनालावण्यवद् अपूर्वरम्यत्वं प्रतीयमानमर्थं च द्योतयति।

खण्डन-मण्डनादिभिः पुष्टः सर्वमान्योऽयं काव्य-सिद्धान्तः। नैतादृशः काव्यसिद्धान्तो भुवनेऽन्यत्रावलो-क्यते। अतएवैतस्य महत्त्वम् उक्तं ध्वनिकारेण।

**एम.ए. संस्कृत**
**मोहन लाल सुखाडिया विश्वविद्यालय**
**उदयपुर**

# श्रीकृष्णमन्त्रमहास्तोत्रम्

( श्रीकृष्णः शरणं मम )

( पूर्वानुवृत्तम् )

❑ आचार्य पं. नथमलशास्त्री दाधीचः

हरेर्नामसहस्राणां कीर्तनं क्लेशनाशनम्।
श्रवणं स्मरणं भक्त्या श्रीकृष्णः शरणं मम।। 381।।

नारायणो हृषीकेशो मुकचुकुन्द वर प्रदः।
सर्वभाव स्वभावेशः श्रीकृष्णः शरणं मम।। 382।।

यमुनोपवनेऽनन्तो व्रजे रेमे हलायुधः।
संकर्षणो बलो रामः श्रीकृष्णः शरणं मम।। 383।।

सर्वेशः सर्वरूपश्च श्रीनिवासः सनातनः।
भक्तार्चितपदाम्भोज श्रीकृष्णः शरणं मम।। 384।।

हरिर्नरहरिः कृष्णो रामो विष्णुश्च माधवः।
स्मरणाद्वन्दनात्प्रीतः श्रीकृष्णः शरणं मम।। 385।।

युधिष्टर प्रतिष्ठाता विदुराय वरप्रदः।
सत्यधर्मरतः शौरिः श्रीकृष्णः शरणं मम।। 386।।

अक्रूरवरदः कृष्णो ह्युद्धवः सम्प्रबोधकः।
भीष्ममुक्तिप्रदः कृष्णः श्रीकृष्णः शरणं मम।। 387।।

यदूनां वृष्टिनाञ्चैव सात्त्वतां ऋषभो हरिः।
ज्ञानिनां योगिनां श्रेष्ठः श्रीकृष्णः शरणं मम।। 388।।

तृणावर्तान्तकः कृष्णः केशिहा कंसनाशनः।
धेनुकासुरसंहारी श्रीकृष्णः शरणं मम।। 389।।

सर्वाङ्गसुन्दरः श्यामः कोटिमन्मथमन्मथः।
वृन्दारण्यप्रियः कृष्णः श्रीकृष्णः शरणं मम।। 390।।

परमार्थः परानन्दः कृष्णः परमपूरूषः।
नारायणो महाहंसः श्रीकृष्णः शरणं मम।। 391।।

श्रीकृष्णः सर्वतोभद्रः कृष्णस्त्रैलोक्यमङ्गलः।
सर्वसङ्कर्षणात्कृष्णः श्रीकृष्णः शरणं मम।। 392।।

मूलाधारे गणाध्यक्षः स्वाधिष्ठाने स्वयं विभुः।
मणिपूरे तु मे कृष्णः श्रीकृष्णः शरणं मम।। 393।।

चक्रे मेऽनाहते कृष्णो विशुद्धे परमेश्वरः।
आज्ञाचक्रे सुगुरोमूर्तिः श्रीकृष्णः शरणं मम।। 394।।

सहस्रदलमध्यस्थः कृष्णो योगेश्वरेश्वरः।
योगधारणया ध्येयः श्रीकृष्णः शरणं मम।। 395।।

कृष्णो हि षट्चक्रेषु नाडीयुक्तेषु योगिभिः।
ध्यायेम बद्धनिःश्वासैः श्रीकृष्णः शरणं मम।। 396।।

यशोदानन्दनो ध्येयो गोपालो गोकुले व्रजे।
ब्रह्मेशानाभिवन्धाहङ्घ्रिः श्रीकृष्णः शरणं मम।।397।।

सर्वैश्वर्यप्रदः श्रीशः सर्वाभीष्टफलप्रदः।
सुखदः शान्तिदः सेव्यः श्रीकृष्णः शरणं मम।। 398।।

स्तोत्रमेतत्पराभक्त्या नित्यं स्वाध्यायसेवितम्।
सर्वसिद्धिप्रदं भूयात् कृष्णभक्तिफलप्रदम्।। 399।।

स्तोत्राणि शास्त्रसाराणि मन्त्राः स्तोत्रसमुद्भवाः।
कृष्णमन्त्रमहास्तोत्रं शास्त्रसारं प्रकाशितम्।। 400।।

कृष्णमन्त्रात्मकं स्तोत्रं कृष्णभक्तिरसाप्लुतम्।
कृष्णप्रीतिकरं सद्यः परमानन्ददायकम्।। 401।।

पुण्यदं सर्वपापघ्नं तापत्रयप्रणाशनम्।
सेवितं श्रावितं भक्त्या चतुर्वर्गफालप्रदम्।। 402।।

अष्टोत्तरशतं जाप्यं पुरश्चर्याविधानतः।
ग्रहपीडाः शमं यान्ति परं सौख्यमवाप्नुयात्।। 403।।

हरेर्लीला कथानाम धामरूपनु कीर्तनम्।
प्राकृतञ्चापि तद्दिव्यं स्तोत्रमेतत्प्रकीर्तितम्।। 404।।

त्रिसन्ध्यं यः पठेन्नित्यं भक्त्या कृष्णं समाश्रितः।
लभते कृष्णसामीप्यं गोलोके वसतिं ध्रुवाम्।। 405।।

श्रीमालीरामात्मज पं. नथमलशास्त्री दाधीच विरचितं श्रीकृष्णमन्त्रमहास्तोत्रं सम्पूर्णम्।

।। श्रीकृष्णार्पणमस्तु।।

( पूर्वप्राध्यापकः ), पो.-छापर ( चूरू )
Mob.: 9351226660

# श्रीकृष्णमन्त्रमहास्तोत्र-समृद्धिः

❑ आचार्य पं. नथमलशास्त्री दाधीचः

अथ- श्रीमद्भिर्वल्लभाचार्यैः प्रेरितो मानसे मुदा।
प्रवृत्तोऽहं परा भक्त्या स्तोत्रेण कृष्णकीर्तने।।

महाप्रभु श्री वल्लभाचार्यमहाराजैर्हृदि सत्प्रेरितो ह्यहमस्मिन् श्रीकृष्णमन्त्र-महास्तोत्र-शाब्दकर्मणि प्रवृत्तोऽहमित्येवास्य रहस्यमिति। अत्राखिलकोटि ब्रह्माण्ड-नायकः परिपूर्णतमो भगवान् श्रीकृष्णः (श्रीकृष्णःशरणं मम) इत्यष्टाक्षरमन्त्रात्मकैः श्लोकैः स्तूयते। तत्रादौ ''यथापूर्वमकल्पयम्'' ततोऽप्यधिकमेवाकृत्या प्रकृत्या वा बृहत्स्तोत्रमिदं सम्पूर्णमिति पूर्वानुवृत्तं प्रकाशितं भारती-पाठकैर्विद्वद्भिः (अप्रैल 2018 तः प्रतिमासं) समवलोक्यत एव।

कृष्णमन्त्रमहास्तोत्रं नित्यं स्वाध्यायसेवितम्।
सर्वसिद्धि प्रदञ्चैतत् कृष्णभक्तिप्रदायकम्।।

अत्रापि स्तोत्रमन्त्र संरचनासाधनास्वाध्याय-समृद्ध-यर्थं शास्त्रोक्तनिर्देशस्य निर्वाहः सम्यक्प्रकारेण स्यादित्यर्थं पाठारम्भे विनियोगो विरचितोऽस्ति।

आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च।
वेदितव्यः प्रयत्नेन ब्राह्मणेन विपश्चिता।।

अतएवास्मिन्स्तोत्रेऽपि विलिख्यते-

अथ श्री वल्लभाचार्यो ऋषिश्चास्य महाप्रभुः।
मन्त्रदो मन्त्रतत्त्वज्ञो मन्त्रद्रष्टा जगद्गुरुः।।
श्रीनाथो भगवांश्चास्य दिव्यमङ्गलविग्रहः।
भुक्तिमुक्तिप्रदो देवः शरण्यो भक्तवत्सलः।।
राधासर्वेश्वरी शक्तिः पराभक्तिप्रदायिनी।
क्लीं बीजं कामदञ्चैव छन्दोऽनुष्टुबुदाहृतम्।।
चतुर्वर्गफलावात्यै स्तोत्रपाठे जपेऽथवा।
सदा श्रीकृष्णप्रीत्यर्थे विनियोगः प्रकीर्तितः।।

अत्र पूर्वमाचार्यगुणगौरवगानम् (सुयशोगाथा)

श्रीनन्दसूनोर्वदनावतारः श्रीधामवृन्दावनवासनिष्ठः।
श्रीनाथ सेवा कुशलो रसज्ञो जगद्गुरोगौरवमादधानः।।
श्रीष्णभक्तिं विमलां विशुद्धां पुपोष यः पुष्टिपथानुगां ताम्।
श्रीवल्लभो वैष्णवसम्प्रदायस्याचार्यवर्यो जयतान्महात्मा।।

ध्यानम् (वन्दना)

श्रीनाथं राधिकानाथं गोपगोपीजनप्रियम्।
गोवर्धनधरं देवं नौमि गोकुलमण्डनम्।।
दक्षिणे यमुना यस्य वामे च वृषभानुजा।
परितो गोपिका यस्य तं वन्दे नन्दनन्दनम्।।

ततश्च -श्रीनाथं गोपिकानाथंध्यात्वा कृष्णं विभुं प्रभुम्।
मन्त्रो ह्यष्टाक्षरो जाप्यः श्रीकृष्णः शरणं मम।।

साधकः सुप्रसन्नो भक्त्या समाहितमनाः सुस्पष्टो-च्चारणपूर्वकं ऊँ सर्वश्रेयस्करः श्रीशः श्रीनिवासः सतां पतिः। श्री निधिः श्रीप्रदः श्रेयः श्रीकृष्णः शरणं मम।

इत्यतः समारभ्य फलश्रुतिसहितं स्तोत्रपाठं कुर्यादितिनिवेदनम्। नित्यस्वाध्यायहेतवे (425) पद्यात्म-कमिदं महास्तोत्रमष्टविरामेषु विभक्तमस्ति। एवञ्च-श्रीनारदपञ्चरात्रोक्त प्रमाणमनुसृत्यैवास्य स्तोत्रस्यातिवि-शिष्टा स्तुति- समृद्धिर्विधीयते।

यथा- प्रगे पूजयित्वेत्यनुस्मृत्य कृष्णं
तदङ्गेन्द्रवज्रादिभिर्भक्तिनम्रः।
सिताभे च हैयङ्गवीनैश्च दघ्ना,
विमिश्रेण दौग्धेन सम्प्रीणयेत्तम्।। (3.10.21)

एतदनुसारेण भक्तजनः प्रत्यहं प्रातः परया भक्त्या विनीतोभूत्वा सितामिश्रितगोदुग्धदधिनवनीतादि-भिर्बालकृष्णं सम्पूज्येन्द्रवज्रोपेन्द्रयग्रादि छन्दोबद्धश्लोकै-भगवन्तं स्तुवीत प्रीणयेच्च। अतो हि स्तोत्रपाठारम्भे विराये वन्द्रवज्रा-श्लोकानां समावेशोविहितः।

स्तोत्रकर्ता कविर्नाहं न प्रणेता न लेखकः।
वल्लभार्य-कृपा दृष्ट्या केवलं श्रुतलेखकः।।

भक्तानां विदुषाञ्चैव सतां सद्गुरूणां तथा
स्तोत्रमेतत्प्रकाश्यं स्याद्वाग्देव्याः सम्प्रसादतः

।। श्रीकृष्णः शरणं मम।।

(पूर्वप्राध्यापकः), पो.-छापर (चूरू)
Mob.: 9351226660

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# वेदविज्ञानानुगतो ब्रह्मसूत्रविमर्शः

सुप्रथिताः खलु वेदविज्ञानपुरोधसः, सकलशास्त्र-पारदृश्वानो मनीषिमूर्धन्या युगप्रवर्तका जयपुरीय-विद्वत्प्रवराः समीक्षाचक्रवर्तिनः पं. मधुसूदन ओझा महाभागा येषां वेदविज्ञानादिविषयकाः शतशो ग्रन्थाः प्रकाशमायाताः शतशश्चाद्यापि प्रकाशमीहन्ते। तेषामेको ग्रन्थो जोधपुरविश्वविद्यालयीयेन ओझाशोधप्रतिष्ठानेन हिन्दीभाषानुवाद-टिप्पण्यादि-सहितः सपद्येव प्रकाशितोऽस्ति यो हि ब्रह्मसूत्रमाधारीकुरुते, वेदोपनिषद्-वेदान्तादिविषयाणां विश्वकोषत्वं च वहतीति ज्ञात्वा प्रसीदेयुः सुधियः। ग्रन्थस्य नामाऽस्ति "शारीरक-विमर्शः।" नाऽत्र शाङ्करभाष्यस्य विमर्शः अपितु ब्रह्मसूत्रस्य सन्दर्भमादाय ब्रह्मविद्यायाः समीक्षणं तदाधारेण च वेद-दर्शनादिविषयाणां सर्वाङ्गीणा प्रस्तुति-रस्ति। ब्रह्मसूत्रं शारीरकसूत्रमित्याख्यायते। तदाधारीकृत्य ओझामहाभागेन सम्पूर्णाया भारतीयज्ञानगङ्गाया विवरण-मस्मिन् ग्रन्थे प्रस्तुतमस्ति। तैर्हि गीताया विज्ञानभाष्यं वैशद्येन प्रणीतमासीदिति जानन्ति विद्वांसः। प्रस्थान-त्रय्यामेकं ब्रह्मसूत्रमाधृत्य तैः शारीरकविज्ञानम् नाम्ना भाष्यं व्यलेखि, ब्रह्मसूत्रस्याधारमादाय विभिन्नान् वेदोपनिषद्-दर्शनमूलकान् विषयान् स्पष्टीकर्तुं शारीरकविमर्शो विलिखितोऽभूद् यो मूलरूपेण प्रथमं सन् 1943 वर्षे तच्छिष्यवर्याणां सर्वशास्त्रविचक्षणानां म.म. पं. गिरिधरशर्मचतुर्वेदिवर्याणां सम्पादने प्रकाशितोऽभूत् किन्तु केवलं मूलतो मुद्रिते तस्मिन् ग्रन्थे न काचन टीकाऽभूत्, नाऽनुवादः। प्रौढग्रन्थोऽयं केवलं प्रौढ-विदुषामेव बोधगम्योऽभूत्।

साम्प्रतमयं ग्रन्थो राष्ट्रपतिसम्मानितेन विविधशास्त्र-पारङ्गतेन विद्वद्वर्येण प्रो. डॉ. गणेशीलालसुथारमहोदयेन हिन्द्यामनूदितः, टिप्पण्यादिभिरलंकृतः सम्पादितश्चेति सुतरां स्वागतार्हः। विशालैः षोडशप्रकरणैरयं ग्रन्थो ब्रह्ममीमांसां विशदयति, स्पष्टीकरोति च यद् ब्रह्मविज्ञानं पुरुष-सृष्टि-श्रुति-दर्शनादीनां मीमांसयैव ज्ञायते, तत्र वेदा अपि प्रमाणम्, उपनिषदोऽपि। तत्प्रसङ्गेन पञ्चप्रकरणेषु वेदानां परिचयः प्रत्तः पौरुषेयत्वापौरुषेयत्वमीमांसा (48 वादैः सह स्पष्टीकृता) विवेचिता, एकस्मिन् प्रकरणे 108 उपनिषदां परिगणनं विवेचनं च प्रस्तुतम्, बहुषु प्रकरणेषु भारतीयदर्शनानां विवरणं तत्र विहिता ब्रह्ममीमांसा च विशदीकृता, पञ्चप्रकरणेषु दर्शनैर्विवेचिता आत्मतत्त्व-मीमांसा स्पष्टीकृता यया सह वेदविज्ञानस्याऽपि समन्वयः प्रदर्शितः।

इत्थं ग्रन्थेऽस्मिन् भारतीयदर्शनानां विमर्शोऽप्यस्ति, वेदाविज्ञानेन सह तेषां सामञ्जस्यमपि विवेचितमस्ति। सप्तमे प्रकरणे प्रसङ्गवशात् मैक्समूलरप्रभृतीनां पाश्चात्यविदुषां वेदविषयकान्यभिमतानि मूलरूपेण आङ्गलभाषायामेव सविस्तरमुद्धृतानि सन्ति। न तेषामनुवादः प्राचीने संस्करणे प्रस्तुतोऽभूत्। अस्मिन् संस्करणे सर्वेषां हिन्द्यामनुवादोऽप्यस्ति, टिप्पण्या-दिकमप्यस्तीति बहुमूल्यमिदं वस्तु। शारीरकसूत्राणां विवेच्यं वस्तु "आत्म" स्वरूपं कथं विविधै रूपैरस्माकं दर्शनेषु विवृतमित्यस्मिन् ग्रन्थे विशदतया स्पष्टीकृत-मस्ति।

अर्धशताब्दीतोऽप्यधिकस्य कालस्य यापनानन्तरं नितान्तमनुपलब्धः प्रौढशास्त्रविवेचनात्मकोऽयं ग्रन्थः

कथं सटीकः सानुवादश्च प्रकाश्येतेति जोधपुर विश्व-विद्यालयीयस्य ओझाशोधप्रतिष्ठानस्याऽभिलाषोऽभूत्। प्रतिष्ठानस्य पूर्वं निदेशकोऽभूद् विद्वद्वर्यो डॉ. गणेशीलालसुथारः। तेन सपरिश्रमसाधनाभिनिवेशं सम्पादितोऽनूदितश्च ग्रन्थोऽयं नूतना दिशः प्रकाशयिष्यतीति स्पष्टमेव। प्रतिपृष्ठं पूर्वं मूलग्रन्थः, तदधस्तात् हिन्द्यनुवादः पाठकानां सौकर्यं कुर्यात्। विषयं प्रस्तुतीकुर्वन्ती भूमिका डॉ. गणेशीलालसुथारवर्येण आङ्गलभाषायां विलिखिताऽस्ति। बहुमूल्यस्यास्य वेदविज्ञानभारतीय-दर्शनसमन्वयपरकस्य ग्रन्थस्य हार्दं स्वागतमाचक्ष्महे।

**शारीरकविमर्शः ले. समीक्षाचक्रवर्ती पं. मधुसूदन ओझा, अनुवादकः सम्पादकश्च प्रो. डॉ. गणेशीलाल सुथार, प्रधानसम्पादक, डॉ. प्रभावती चौधरी, प्रकाशक-पण्डित मधुसूदन ओझा शोधप्रकोष्ठः, संस्कृतविभागजयनारायणव्यास जोधपुरविश्वविद्यालय-जोधपुर 342001, पृ. सं. 400 मू. 750/-.**

## डॉ. राजेन्द्रमिश्राणां यक्षगानम्

सुप्रथितः खलु कविमूर्धन्यो राष्ट्रपतिसम्मानितः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरः, शिखरस्तरीयो मनीषी डॉ. अभिराजराजेन्द्रमिश्रो यस्य शतशः कृतिसङ्कलनानि प्रकाशितचराणि। तस्य गीतयः महाकाव्यादिकं, मुक्तकरचनाः, नाट्यविधाबद्धाः कृतयः सुप्रसारिताः संस्कृतजगति। तस्य हि नूतनं प्रकाशनं ''यक्षगाना'' ख्यविधाबद्धानां चेतोहारिनाट्यरचनानां संग्रहः नवीनमेव किञ्चन कृतिशिल्पं प्रतिनिदधाति।

एकेनैव नटेन कथानकविशेषं, घटनाविशेषं, भावनाविशेषं वाऽऽदाय सम्पूर्णामेकां नाट्यरचनां मञ्चोपरि कदाचन ससङ्गीतं, कदाचन सनृत्यं प्रस्तुवन्ती नाट्यविधा दक्षिणे भारते ''यक्षगान'' पदेनाभिधीयते इति विदन्त्येव विद्वांसः। इदं खलु ''मोनोलोग'' पदाभिहितया नाट्यप्रस्तुत्या समानी काचन प्रस्तुतिः। कन्नडादिदक्षिण-भारतीयभाषासु यक्षगानानि सुविदितानि, संस्कृतेऽपि शतशस्तादृश्यो नाट्यरचना दक्षिणभारते विद्वद्भिः प्रणीता अभूवन्। एवंविधानां नाट्यकृतीनामितिहासः, संग्रहश्च सुप्रथितेन विद्वद्वर्येण श्रीरामकृष्णमाचार्युलुमहाभागेन साधु प्रणीतः, सम्पादितः, प्रकाशितचरश्च, समीक्षित-चरश्चायं भारत्याम्।

एवंविधायां यक्षगानपद्धत्यां लोकमानसविनोदिनी मोनोलोग (एकालाप) शिल्पबद्धकृतिः उत्तरभारतीय-दर्शकानां प्रमोदाय विरच्येतेति हार्दिकोऽभिलाषः राजेन्द्रमिश्रस्य मानसे समुद्भूतो यदनुरूपं विविध-कथ्यवस्तून्यादाय विविधशिल्पबद्धानि दश यक्षगानानि कविवर्येण गद्ये, पद्ये, गीतिविधायां च नटालापं निबध्नता प्रणीतानि प्रकाशितान्येकस्मिन् ग्रन्थे यस्याभिधान ''औदीच्य यक्षगानम्'' उत्तरभारतीयेयं कृतिरित्येव सूचयति, न खल्वौदीच्यपदस्याऽन्यः कश्चनाऽर्थः।

यक्षगानेष्वेषु कस्मिंश्चन महाभारतकथागतस्य कर्णस्यान्तिमा स्थितिः प्रस्तुताऽस्ति ''कर्णावसानम्'' शीर्षके, कुत्रचन ययातेरेकालापोऽस्ति, अन्यस्मिन् कुन्तीसन्तापोऽस्ति। वर्तमानकालिकस्थितीनां चित्रणाय लोकगीतिविधामनुसरन्त्यां गीतशैल्यां गायकद्वयं मञ्चे कथं वर्तमानदुरवस्थां समभिव्यनक्तीति प्रस्तुवदेकं यक्षगानमस्ति ''बम्लहरी'' नामकं यस्य शैली सुप्रथिताऽस्त्युत्तरभारते। इदं पद्यबद्धमस्ति। एवं यक्षगानत्रयं पद्यबद्धं, सप्तकं गद्यबद्धम्।

नूतनायामस्यां नाट्यविधायां प्राञ्जलभाषया, चेतोहा-रिशैल्या च यक्षगानानि प्रस्तूय राजेन्द्रमिश्रवर्यैर्नवीन एव पन्थाः प्रदर्शितः। नूतनेयं नाट्यविधेति कथनस्यास्य

नायमाशयो यदाधुनिकी सेयं विधा। विधा त्वियं पुराणी किन्तु संस्कृतमञ्चानां कृतेऽल्पप्रयुक्ता विधाऽस्ति अतः नवीनः प्रयोगोऽयमित्यभिहितः। स्वागतमस्याचरिष्यते संस्कृतजगतीति स्पष्टमेव।

**औदीच्ययक्षगानम्- ले. अभिराजराजेन्द्रमिश्रः प्रकाशकः वैजयन्त प्रकाशनम् 8 बाघम्बरी मार्ग, भरद्वाजपुर (अल्लापुर) इलाहाबाद पृ.सं. 10 मूः 300/-.**

## नागराजकाव्यसङ्कलनम्

सुप्रथिताया दिनपत्रिकायाः ''सुधर्मायाः'' सम्पादको विद्वान् डॉ. एच. वी. नागराज रावः स्वयं सुकविः, कथाकारः, व्याख्यानविशारदः, विविधभाषाभिज्ञश्चास्तीति जानीयुरेव संस्कृतसेवकाः। राष्ट्रपतिसम्मानितोऽयं विद्वान् कन्नडभाषातः कथासाहित्यं संस्कृतेऽनूद्य केन्द्रीयसाहित्य अकादम्याः संस्कृतानुवादपुरस्कारेणापि सभाजितोऽस्ति। विद्वद्वर्यस्यास्य काव्यरचनानां संग्रहः ''नागराजकाव्यलहरी'' नाम्ना प्रकाशितोऽस्ति। संग्रहेऽस्मिन् दशकाव्यकृतयः सङ्कलिताः सन्ति यासु देवस्तुतयोऽपि विद्यन्ते, दुर्जनशतकम्, सज्जनशतकम् प्रभृतीति पञ्च शतकानि सन्ति, सूक्तिद्विशतीनाम्ना द्विशतकमेकमप्यस्ति।

काव्यरचनासु कवेः प्रतिभा स्पष्टं जागर्ति। समये समये विविधान् विषयानादाय निबद्धा इमाः काव्यकृतय उपजाति-शिखरिणी प्रभृतिच्छन्दःसु रचिताः सन्ति यासु काव्यशिल्पचमत्कारो द्रष्टुं शक्यते। नागराजशतके प्रतिपद्यं कविः स्वं सम्बोधयति (मोहं जहिहि नागराज इत्यादि) वर्तमानस्थितीश्च चित्रयति। शतकस्यास्य प्रतिपद्यमाङ्गलभाषायामनुवादोऽपि मुद्रितः। एवमेव सज्जनशतक-श्रीरामचन्द्रशतकयोरप्यनुवादः प्रतिपद्यमाङ्गलभाषायामस्ति। वार्ताविमर्शशतके कलियुगस्य चित्रमस्ति, सूक्तिद्विशती प्रसङ्गे कविः ''अन्योक्तिसरणिः'' ''सङ्कीर्णसरणिः'' इत्यादि शीर्षकान्तर्गतं मुक्तकरचनाः सङ्कलयति।

प्रसादगुणयुक्ता इमा रचना निश्चितमेव पाठकान् प्रमोदयिष्यन्ति। स्वागतार्हमिदं सुधर्मा -प्रकाशनम्।

**नागराजकाव्य लहरीः कविः विद्वान् डा. एच.वी. नागराज राव, प्रका. सुधर्मा प्रकाशन नं. 561, रामचन्द्र अग्रहार, मैसूर पृ.सं. 204, मू. 200/-.**

## श्रीरामजन्म

**❑ पं. रमेशचन्द्र शर्मा**

यस्मिन् रमन्ते खलु योगिनश्च। तमेव रामं हृदि संस्मरामि।।
जन्मोत्सवः तस्य नरोत्तमस्य। नमामि बालं रघुवंशनाथम्।। 1।।

शुभे च लग्ने शुभ चैत्र शुक्ले। पुनीत मासे च तिथौ नवम्याम्।।
आनन्दधामे हि समस्त भारते। जन्मोत्सवः यस्य नु मान्यते च।। 2।।

श्री रामरूपं मनसा स्मरामि। नमामि बालं रघुनन्दनं च।।
नित्यं रसानन्दमयं स्वरूपम्। ध्यायन्ति यं साधुजनाः प्रसन्नाः।। 3।।

कर्णे विलालं कलकुण्डलं च। वक्षस्थले कौस्तुभमाल्यशोभा।।
अङ्के सदा यस्य विराजते श्रीः। तं लोकनाथं नितरां नमामः।। 4।।

प्रिया अयोध्याच प्रिया च सीता। प्रियश्च रामः भरतश्च लक्ष्मणः।।
सदा हि शत्रुध्नप्रियाश्च भ्रातरः। नमामि भक्तं रिपुसूदनं तम्।। 5।।

मन्यामहे जन्ममहोत्सवश्च। येषां हि शरणे च वयं वसामः।।
वयं प्रसन्नाः शरणे सदैव। धन्याश्च वत्साः चरणे शरण्याः।। 6।।

वयं हि वत्साः जगदीश्वरस्य। स एव रामः भुवि कोशलेशः।।
जन्मोत्सवाः यस्य युगे युगे च। भवन्ति भूमौ प्रियभारतस्य।। 7।।

धर्मस्य वृद्धिः खलु पापनाशनम्। सदाहि रक्षा ननु सज्जनानाम्।।
असज्जनानामपि दण्डनार्थम्। रामावतारो भवतीह लोके।। 8।।

व्याख्याता,
106, ग्रीनपार्क, बेनाड़ रोड, दादी का फाटक
झोटवाड़ा, जयपुर

# अस्माकं गुरवः

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

**''आंग्लशासका:! भारतं त्यजत'' आन्दोलनं प्रति समीचीना दृष्टि:।**

गुरुमहाभागानां सरसंघचालके जाते कतिपय वर्षेष्वेव तेषां योग्यतायाः कठिनपरीक्षायाः घटनाः जायमाना आसन्। देशं परितो यवनानां हिन्दूनामुपरि भीषणान्याक्रमणान्यभवन्। आंग्लशासकानामपि तेषु प्रत्यक्षमप्रत्यक्षं च समर्थनमेवासीत्। द्वितीये विश्वयुद्धे आंग्लसैन्यं सर्वेषु क्षेत्रेषु पराजितमासीत्। परं दौर्भाग्येन तस्य लाभं प्राप्तुं योग्या कापि संगठिता राष्ट्रव्यापिनी शक्तिर्नासीत्। तादृश्या शक्त्या विनैव कांग्रेसनायकैः 1943 ई. वर्षे अगस्तमासस्य नवम दिनतः ''आग्लशासकाः भारतं त्यजत'' आन्दोलनस्य प्रारम्भः कृतः। सम्पूर्णेऽपि देशे महदान्दोलनं तु प्रारब्धम् परमसंगठितत्वाद् दिशाविहीनत्वात्सामाजिकैः विविधप्रकाराणि त्रोटनभंजनादीनि कार्याणि कृतानि, शासकैरपि क्रूरातिक्रूरा दमननीतिः स्वीकृता। द्वित्रेषु मासेष्वेवान्दोलनस्फुलिङ्गाः शान्ता अभवन्। सर्वे कांग्रेसनायकाः कारागारेषु बद्धा अभवन्। तेषां मुक्तेरपि काप्याशा नासीत्। अस्यां स्थितौ देशे सर्वत्र हताशा किंकर्त्तव्यविमूढता संव्याप्ता। स्थितेर्लाभं प्राप्तुं यवननायकैरपि हिन्दुविरोधिनी दृष्टिरुग्रा कृता।

भारतं त्यजतेत्यान्दोलने प्रारब्धे एव संघस्य सम्मुखे तस्मिन् सहयोगः करणीयो न वेति विचारः समायातः। तद् दृष्ट्या सर्वविषयके विचारे कृते गुरवोऽस्मिन्निर्णये प्राप्ताः समस्तं संघं तस्मिन्नप्रवेश्य व्यक्तिशः स्वयंसेवकाः प्रेरितव्याः। गुरुमहाभागानामेष विचारः द्राक्तरमहोदयानां नीत्यनुसार एवासीत्। संघेन च स्वं पूर्णं ध्यानं शक्तिश्च हिन्दूनां संगठितां शक्तिं वर्द्धयितुं नियोजिताः। गुरवश्चानया दृष्ट्या समग्रदेशे भ्रममाणाः हिन्दून् आत्मरक्षार्थमुद्यतान् कर्तुमाह्वयन्त आसन्। तैः कथितमस्माकं सौभाग्येनैवावसरोऽयं संप्राप्तः। राष्ट्रस्य जीवनं यदा सुखसंपन्नं भवति ततः कतिपयगुणितात्, स्वसत्यत्वं त्यागं पौरुषं प्रदर्शयितुं सन्धिः एतादृशे संकटकाले एव प्राप्नोति।

मोहमदअलीजिन्नाहस्य मुस्लिमलीगसंगठनं देशविभाजननीत्यन्तर्गतं 16-8-46 दिवसं प्रत्यक्षसंघर्षदिवसमुद्घोष्य हिन्दुहत्याताण्डवं प्रारभत। परमेकद्विदिवसेष्वेव हिन्दवो जागृता अभवन् यवनानां चोत्तरं प्रारभ्योत्साहो मन्दीकृतः। तेष्वेव दिवसेषु गुरवो देशभ्रमणेन प्रत्येकस्मिन् भाषणे देशविभाजनविरुद्धं बहुदृढतापूर्वकं स्थातुं हिन्दुसमाजमाह्वयन्त आसन्। परं कांग्रेसनेतारस्तु अखण्डभारतार्थं योद्धुमुद्यता एव नासन्। मनसा पराजिता आसन्। पण्डितेन जवाहरलालनेहरूणा स्वयमेव स्पष्टशब्देष्विदं कथितमासीत्। तस्मिन् समये च हिन्दूनां सुरक्षार्थं क्षेत्रे संघस्वयंसेवकैर्विना नान्यः कश्चिदासीत्।

**ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्** **पंचसप्ततितमः प्रसङ्गः**

# गीतायां विज्ञानम्

❑ श्रीमती आराधना धर्माधिकारी

चेन्नई प्रान्ते समुद्रतटे उपविष्ट एकः साधुपुरुषो गीतापाठं कुर्वन् आसीत्। एको युवा छात्रस्तत्रागतः। सोऽवदत्-अयि किमस्मिन् विज्ञानयुगेऽपि गीतापाठः क्रियते। अद्यत्वे तु जनाश्चन्द्रोपरि गताः। तत्र निवासस्य च स्वप्नं पश्यन्ति। एको भवादृशः गीतारामयणयोरेव संलग्नः। साधुपुरुषोऽब्रवीत्-गीताविषये त्वं किं जानासि। आवेशेन स युवाऽब्रवीत् अहं साराभाईशोधसंस्थानस्य छात्रोऽस्मि, अस्माकं कृते नास्त्येतादृशानां ग्रन्थानां महत्वम्। साधुपुरुषः प्राहसत्। अत्रान्तरे यानद्वयं तत्र समागतम्। एकस्मिन् याने श्यामवर्णवेशधारिणो बहवोऽङ्गरक्षकाः सैनिका आसन्, अन्यस्मिंश्च एक एव तद्यानादवतीर्य सैनिकेन द्वारमुद्घाटितम्-साधुपुरुषस्तस्मिन् प्रविश्योपविष्टः। तदैव विस्मितेन तेन युवकेन प्रधाव्य पृष्टं भगवन् को भवान् ? तेन च विक्रमसाराभाईत्युत्तरितम्, यानं प्रचलितम्। तदनन्तरं विस्मितेन तेन युवकेन भगवद्गीतायाः सम्यगध्ययनं कृतम्। आजीवनं च मांसभक्षणं परित्यक्तम्। सोऽयं छात्रः भारतस्य प्रथमः शिक्षामंत्री मौलाना अब्दुल कलामः आजादः आसीत्।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

बालोपयोगिनी लघुकथा

# भारतभूम्याः विभूतयः

❑ अविनाश शर्मा

## वामनः

भगवतः वामनस्यैव नाम त्रिविक्रमोऽप्यस्ति। येन वामनेन त्रिपादेन मानदण्डेन त्रैलोक्यं मापितम्। वामनावतारस्य कथा पुराणेषु सुप्रसिद्धाऽस्ति।

भक्तराजस्य प्रह्लादस्य पौत्रोऽसुरराजो बलिरासीत्। इन्द्रेण पराजितः स भृगुवंशीयानां ब्राह्मणानामेकनिष्ठः सेवको बभूव। प्रसन्नानां भृगुवंशीयब्राह्मणानामनुग्रहेण पुनः निःसीमं सामर्थ्यं संप्राप्य तेनेन्द्रस्योपरि आक्रमणं कृतम्। प्रबलमाक्रमणं सोढुमसमर्थो देवराजः विष्णुसमीपं जगाम। विष्णुनाप्युक्तं यत् ''तस्यासुरराजस्य बलं ब्राह्मणानामुपासनेन एतादृशमपरिमितं संजातं यदधुना स्वर्गं विहाय पलायनमेवोचितम्। इदानीमसुरराजः ब्रह्मतेजस उपासना-सम्पादनात् सर्वथा धर्मनिष्ठो संजातः'' ब्रह्मतेजसः प्रतीकारमसम्भवम्।

स्वर्गान्निर्गतमिन्द्रं विलोक्य देवानां दशा दयनीया बभूव। तेषां देवानां माता अदितिः इमां स्वपुत्राणां दीनां दशां विलोक्य दयार्द्रा संजाता। तया स्वपत्युः कश्यपऋषेः सम्मुखमियमन्तर्वेदना प्रकटिता। तेन कश्यपेनोक्तम् यत् 'देवाः यदि असुरेभ्य अधिकतमं ब्रह्मबलं धर्मबलञ्च अर्जयिष्यन्ति तदैव विजयलाभं करिष्यन्ति। एतदर्थं धर्ममूर्तेः धर्मरक्षकस्य च नारायणस्याराधना करणीया। स एव नारायणः देवानां इमां दीनदशामपहर्तु समर्थः। स असुरराज इदानीं पूर्णतः धर्मनिष्ठोऽस्ति अतस्तव पुत्राः देवाः तेषामनिष्टं कर्तुं' सर्वथाऽसमर्थाः सन्ति।

तदनन्तरं भगवत्या अदित्या अत्युग्रं तप अनुष्ठितम्। तस्या उग्रतपसः प्रभावेण स्वयं भगवान् विष्णुस्तस्याः कुक्ष्यां वामनरूपेण प्रकटितो बभूव। अवतरितेन वामनेन तस्या अदित्या देव्या कामनापूर्तेः वचनमपि प्रदाय सा आश्वस्ता कृता।

असुरराजो बलिः स्वेन्द्रपदं स्थिरीकर्तुं शतसंख्यकानां अश्वमेधयज्ञानां पूरणार्थं सचेष्ट आसीत्। यज्ञाश्च ब्राह्मणसंस्कृतेः प्राणाः सन्ति। अतस्ते शतसंख्यकाः यज्ञाः यदि परिपूर्णाः संजाताः तर्हि बलिमिन्द्रासनाद् भ्रंशयितुं न कोऽपि समर्थ आसीत्। वामनः ब्राह्मणो भूत्वा तस्य बलिनृपतेरश्वमेधयज्ञे समुपस्थितो बभूव। बलिना समागतस्य ब्राह्मणस्य समुचितं स्वागतं कृतम्। तदनन्तरं यदा तेन बलिनृपतिना वामनस्य सम्मुखमभीष्टकथनाय प्रार्थितं तदा तेन वामनेन त्रिपादपरिमिता भूमिः याचिता। दैत्यगुरुणा श्रीशुक्राचार्येण विष्णोरियं माया ज्ञाता असुरराजो च भूप्रदानार्थं तेन निषिद्धः। बलिभूपति-स्तु पूर्वप्रदत्तवचनानुसारं भूमेः प्रदानार्थं यथापूर्वं सुसिद्ध आसीत्। विष्णुना पादद्वयेन भूलोकं स्वर्गलोकं च सम्माप्य इमे लोकद्वये महेन्द्राय प्रदत्ते। तृतीयपदस्य मानार्थं तस्य बलिनृपतेः समीपं न किमप्यवशिष्टमासीत्। अस्य परिणामादस्य बलिनृपतेः पुण्यक्षयः जातः। अनुचितमपि तेन स्वगुरुवचनं न पालितमतः तस्य दुष्परिणामादयं क्षीणबलो बलिः वरुणपाशेन बद्धो बभूव।

सम्पूर्णेनैश्वर्येण भ्रष्टोऽपि स बलिर्भगवन्निष्ठाशून्यो न बभूव। तत्परिणामात्सः वरुणपाशेन मुक्तो जातः। भगवता विष्णुना तेन रसातलस्य राज्यमपि सम्प्राप्तम्। संक्षेपेणेयमेवास्ति वामनावतारस्य कथा। अस्यां कथायां ''धर्मो रक्षति रक्षितः'' इत्युक्तिः चरितार्था जाता। धर्मरक्षार्थं भगवता विष्णुना भिक्षासदृशी निन्दनीयाऽपि वृत्तिः स्वीकृता। अतः

**वयमपि सर्वे स्वधर्मस्य स्वसंस्कृतेः रक्षणार्थं बद्धपरिकराः सदैव सचेष्टिताश्च भवेम।इति।**

## वामन

भगवान् वामन का ही नाम त्रिविक्रम भी है। जिन वामन के तीन पग के मापदण्ड से त्रिलोकी को नापा था। वामन अवतार की कथा पुराणों में सुप्रसिद्ध है।

भक्तराज प्रह्लाद का पौत्र असुरराज बलि था। इन्द्र के द्वारा पराजित वह भृगुवंशीय ब्राह्मणों का एकनिष्ठ सेवक हो गया। प्रसन्न भृगुवंशीय ब्राह्मणों के अनुग्रह से पुनः निःसीम सामर्थ्य प्राप्त करके उसके इन्द्र के ऊपर आक्रमण किया। प्रबल आक्रमण को सहन करने में असमर्थ देवराज विष्णु के समीप गए। विष्णु ने भी कहा कि ''उस असुरराज का बल ब्राह्मणों की उपासना के कारण ऐसा अपरिमित हो गया है कि अभी स्वर्ग को छोड कर भाग जाना ही उचित है। इस समय असुरराज ब्रह्मतेज की उपासना करने से सर्वथा ब्रह्मनिष्ठ हो गए, ''ब्रह्मतेज का बल ही (सच्चा) बल है'' अतः ब्रह्मतेज के बल का प्रतीकार असम्भव है।''

स्वर्ग से निकले इन्द्र को देख कर देवों की दशा दयनीय हो गई। उन देवों की माता अदिति इन अपने पुत्रों की दीन दशा को देख कर दयार्द्र हो गयी। उसने अपने पति कश्यप ऋषि के सम्मुख इस अन्तर्वेदना को प्रगट किया। उस कश्यप ने कहा कि ''देव यदि असुरों से अधिकतम ब्रह्मबल और धर्म बल अर्जित करेंगे तभी विजयलाभ प्राप्त करेंगे। इसलिये धर्ममूर्ति और धर्मरक्षक नारायण की आराधना करनी चाहिये। वे नारायण ही देवों की इस दीनदशा को दूर करने में समर्थ। वह असुरराज इस समय पूर्णतः धर्मनिष्ठ है। अतः तुम्हारे पुत्र देव उनका अनिष्ट करने में सर्वथा असमर्थ है।''

तदनन्तर भगवती अदिति ने अत्युग्र तप किया। उसके उग्र तप के प्रभाव से स्वयं भगवान् विष्णु उसकी कोख में वामन के रूप में प्रकट हुए। अवतार लिये वामन ने उस अदिति देवी की कामना पूर्ति का वचन भी देकर उसे आश्वस्त किया।

असुरराज बलि अपने इन्द्र पद को स्थिर करने को सौ संख्या में अवश्मेध यज्ञ पूर्ण करने को सचेष्ट थे, और यज्ञ ब्राह्मण संस्कृति के प्राण हैं। यदि वे सौ संख्या के यज्ञ पूर्ण हो जाते तो बलि को इन्द्रासन से भ्रष्ट करने को कोई समर्थ नहीं था। वामन ब्राह्मण होकर उस बलि नृपति के अवश्मेध यज्ञ में समुपस्थित हुए। बलि ने आकर उन ब्राह्मण का समुचित स्वागत किया। उसके बाद जब उस बलि राजा ने वामन के सम्मुख अभीष्ट कथन की प्रार्थना की तब उन वामन ने तीन पग भूमि मांग ली। दैत्यगुरु शुक्राचार्य ने विष्णु की यह माया जान ली और असुरराज को भूमि देने को निषेध कर दिया। बलि राजा तो पूर्वप्रदत्त वचन के अनुसार भूमि के प्रदान के लिये यथापूर्व सुसिद्ध था। विष्णु ने दो पाँवों से (कदमों से) भूलोक और स्वर्गलोक नाप कर ये दोनों लोक इन्द्र को दे दिये। तीसरे पांव के नापने के लिये उस नृपति के पास कुछ भी अवशिष्ट नहीं था। इसके परिणाम से बलिनृपति का पुण्यक्षय हो गया। अनुचित भी उसने अपने गुरु के वचन को नहीं पाला इसलिये उसके दुष्परिणाम से यह क्षीण बलवाला बलि वरुणपाश से बद्ध हो गया।

सम्पूर्ण ऐश्वर्य से भ्रष्ट हुआ भी वह बलिराज भगवन्-निष्ठा से शून्य नहीं हुआ। उसके परिणाम से वह वरुणपाश से मुक्त हो गया। भगवान् विष्णु से उसे रसातल का राज्य भी प्राप्त हुआ। संक्षेप में यह ही वामनावतार की कथा है। इस कथा से ''धर्म रक्षा करने पर (वह धर्म) व्यक्ति की रक्षा करता है'' यह उक्ति चरितार्थ होती है। धर्म की रक्षार्थ भगवान् विष्णु ने भिक्षा जैसी निन्दनीय वृत्ति भी स्वीकार की। इसलिये हम भी सब स्वधर्म और संस्कृति की रक्षा के लिये कमर बांध कर सदैव सचेष्ट होवें। इति

**किशनपोल बाजारः, जयपुरम्**

नारी-स्तम्भः

# वृक्षमाता थिमक्का

❑ डॉ. राजेश्वरी भट्ट

वृक्षाणां संरोपणं संरक्षणञ्च भारतीयानां परमो धर्मो वर्तते। सर्वाङ्गसार्थका वृक्षा मानवस्य परमोपकारकाः सन्ति। इमे मूल-त्वक्-पत्र-पुष्प-फल-छायादिभिरुपहारैः विशेषेण प्राणवायुना पर्यावरणं रक्षन्ति। एकोऽपि सुपल्लवितो वृक्ष आत्म-प्रदत्तैर्दिव्योपहारैरागतानतिथीन् तर्पयति सहैव प्राणवायुं प्रदाय पर्यावरणं रक्षति। एकं वृक्षमारोप्यापि अनेकेषां पुण्यानां फलं प्राप्नोति। कथितञ्च-

अतीतानागतांश्चैव पितृवंशांश्च भारत।
तारयेद् वृक्षरोपी तस्माद् वृक्षान्प्ररोपयेत्।।

(महा-अनुशासनपर्व)

मानवजीवने वृक्षाणां महतीमुपयोगितां जानन्तोऽपि केचित् प्रकृतिप्रदूषकाः, स्वार्थ-परायणाः, धर्मविमुखाः कुठारहस्ता अविवेकिनो वृक्षाणां संरोपणं तु दूरे तिष्ठतु तेषां छेदनं कर्त्तुं सन्नद्धा दृश्यन्ते। अनवरतगत्या वर्द्धमानं प्रकृतिप्रदूषणं रोद्धुं पर्यावरणविदः, सर्वकारः सहैव राष्ट्रस्य जागरूका मानवा प्रयत्नवन्तो दृश्यन्ते। अङ्गुलीगण्येष्वेषु प्रकृत्यनुरागिषु 2019 तमे 'पद्मश्री' इति दुर्लभेन पुरस्कारेण पुरस्कृता 'श्रीमती सालु-मारदाथिमक्का' विशेषेणोल्लेखनीया विद्यते। सम्प्रति 106 वर्षीया 'सालु मारदा थिमक्का' कर्नाटकप्रदेशे हेलीकलग्रामे निर्धनपरिवारे जनिमलभत।'थिमक्का' इति जन्मनाम्ना वर्धमाना इयं कन्या धनाभावादिभिरनैकैः कारणैश्च समुचितशिक्षया वञ्चिताऽभवत्। मात्रा सह गृहे कार्येषु द्वितीययाऽनया वयसः विंशति वर्षाणि व्यतीतानि। ततः पुत्रीं विवाहयोग्यामनुभूय अभिभावकैः थिमक्काया विवाहः कृषिकार्ये संलग्नेन युवकेन सह विहितः। कतिपय-वर्षानन्तरं ज्ञातं यत् थिमक्का आजीवनं मातृसुखेन वञ्चिता भविता। समयः स आसीत् यदा निःसन्तानता नार्यः कृते अभिशापोऽवर्तत। शनैः शनैरभावेनानेन, गृहे परिवारे, परिवेशे, समाजे यत्र, तत्र व्यङ्ग्यवचनै-राहता थिमक्का प्राणांस्त्यक्तुमुद्यताऽभवत्। ईदृशे विषये समये वावदूकाननपेक्ष्य थिमक्कायाः सहचरः पत्न्याः कृते विश्वासभूमिरभवत्। इदानीमिमौ दम्पती आत्मनो वात्सल्यभावं वृक्षैः सह विभक्तुं मतिमकुरुताम्। सम्प्रति नवनवानां वृक्षाणां समारोपणं, तेषां संपोषणञ्च द्वयोः लक्ष्यमासीत्। आदिवसं क्षेत्रे कार्यं कृत्वा अपराह्णसमये राजमार्गमुभयतः इमौ वृक्षारोपणकार्ये संलग्नौ अभवताम्। प्रकृत्यनुरागिणोः दम्पत्योः सततश्रमेण महता प्रयत्नेन च द्विक्रोशं यावत् राजमार्गः प्रायः 400 संख्याकैः वटवृक्षैराच्छादितो हरीतिमायुक्तो जनाकर्षकश्च जातः। एतदतिरिक्तं वृक्षारोपण-व्रतधारिणी थिमक्का भिन्न-भिन्नजातीनां 4000 संख्याकानां वृक्षाणां संरोपणं कृत्वा दक्षिणप्रदेशे उटजे, ग्रामे, नगरेषु वा 'थिमक्का' इति जन्मनाम्नः पूर्वं 'सालुमारदा', इत्युपाधिना सम्मानिता जाता। दक्षिणभारते 'सालुमारदा' शब्दो वृक्षाणां पंक्तिः इत्यर्थे प्रयुक्तो भवति। सालुमारदा थिमक्काया अनन्यवृक्षानुरागेणाभिभूता दाक्षिणात्या अत्यादरेण थिमक्कायै वृक्षमाता इत्यादरोक्तिमपि प्रयुञ्जन्ति।

**1991 तमे सालुमारदा थिमक्कायाः पत्युर्निधनं जातम्। किन्तु प्रकृतिं प्रति सर्वथा समर्पितेयं वृक्षानुरागिणी स्वसंकल्पाद् मनागपि विचलिता न जाता। काले गते शोकसागरादुन्मज्य थिमक्का वृक्षारोपणाभियानं प्रति अग्रणीः जाता। एतस्मिन्नन्तरे कदाचिद् ''उत्पत्स्यते मम च कोऽपि समानधर्मा'' इत्युक्तिं सार्थिकीं कुर्वाणः कोऽप्युच्चाधिकारी 'सालुमारदाथिमक्काया' महत्तपसाऽभिभूतोजातः। समाचारमाध्यमेन सः थिमक्कायाः साक्षात्कारं कारितवान्। ततः प्रभृति प्रकृतिप्रियायाः सालु-मारदाया तपः जनप्रेरणास्रोतो जातम्। अधुना थिमक्का लोके सर्वत्र विश्रुता, सम्मानिता वर्तते। थिमक्काया महतीषूपलब्धिषु काश्चिद्त्रोल्लखनीयाः सन्ति-**

**1. 1996 तमे वर्षे National citizen Award**

**2. 1997 तमे वर्षे, इन्दिरागांधी प्रियदर्शिनी वृक्षमित्र सम्मानेन सम्मानिता।**

**3. 2006 कल्पवल्ली उपाधिना सम्मानिता जाता।**

**4. 2015 प्रकृतिप्रियासालुमारदा पुस्तकस्य प्रकाशनं जातम्।**

**5. 2016 विश्वस्य '100' प्रभावशालिनीषु महिलासु प्रतिष्ठिता जाता। वृक्षारोपणस्य संकल्पं मनसि संधार्य प्रारब्धा तस्या यात्रा, शून्यात् शिखरं प्रति अग्रे प्रयान्ती सालुमारदाथिमक्काया भव्या यात्रा लोके प्रेरणीया प्रशंसनीया च वर्तते।**

## हिन्दी अनुवाद

वृक्षारोपण एवं उनका संरक्षण भारतीयों का परम धर्म है सर्वाङ्गसार्थक वृक्ष मानव के अत्यन्त उपकारक है। वृक्ष अपने मूल-त्वचा, पत्र-पुष्प, फलादि उपहारों से मुख्यतः शुद्ध प्राणवायु से पर्यावरण की रक्षा करते हैं। एक भी हरा भरा वृक्ष अपने द्वारा प्रदत्त इन दिव्य उपहारों से आगन्तुकों, अतिथियों को प्रसन्न एवं तृप्त करता है। साथ ही प्राणवायु प्रदानकर पर्यावरण की रक्षा करता है। वृक्षारोपी एक वृक्ष को लगाकर अनन्त पुण्यों का फल प्राप्त करता है। कहा भी गया है -

वृक्ष लगाने वाला व्यक्ति अपने स्वर्गस्थ एवं आने वाली पीढ़ी के सदस्यों का उद्धार करता है अतः वृक्षारोपण मानव कल्याण का साधन है, मानव जीवन में वृक्षों की महती उपयोगिता को जानते हुए भी कुछ प्रकृति प्रदूषक, स्वार्थसाधक, धर्म विमुख, विवेकहीन, व्यक्ति कुठार हाथ से उठाकर, वृक्ष लगाना तो दूर वृक्ष काटने के लिए तत्पर रहते हैं।

निर्बाधगति से बढ़ते हुए प्रकृति प्रदूषण को रोकने के लिए पर्यावरणवेत्ता, सरकार, साथ ही राष्ट्र के जागरूक सदस्य प्रयत्नशील हैं। अङ्गुलीगण्य इन प्रकृतिसंरक्षकों में 2019 में 'पद्मश्रीपुरस्कार' से पुरस्कृता 'श्रीमती सालुमारदाथिमक्का' विशेषरूप से उल्लेखनीया है। जीवन के 105 वर्ष व्यतीत कर 106 वें वर्ष में प्रवेश करने वाली सालुमारदा थिमक्का का जन्म कर्नाटक प्रदेश के 'हुलीकल' गांव में एक निर्धन परिवार में हुआ। इनका जन्म नाम थिमक्का रखा गया धनाभाव एवं अन्य कारणों से 'थिमक्का' समुचित शिक्षा ग्रहण करने में असमर्थ रही। माता के साथ गृहकार्यो में व्यस्त कन्या थिमक्का शनैः शनैः बीस वर्ष की हो गई। कन्या की विवाह योग्य अवस्था देखकर अभिभावकों ने कृषिकार्य में संलग्न युवक के साथ पुत्री थिमक्का का विवाह सम्पन्न किया। कुछ वर्षो के पश्चात् ज्ञात हुआ कि थिमक्का आजीवन मातृसुख से वञ्चित रहेगी। उस समय निःसन्तानता स्त्री के लिए अभिशाप थी। धीरे-धीरे सन्तान के अभाव से त्रस्त घर,

पड़ौस परिवार, समाज द्वारा किए गए व्यङ्ग्य वचनों से आहत 'थिमक्का' प्राण त्यागने के लिए उद्यत हो गई। ऐसे विषम समय पर व्यङ्ग्य विशारदों की उपेक्षा करने वाले 'थिमक्का' के पति ने पत्नी के विश्वास सूत्र को दृढ़ किया। 'थिमक्का' एवं उनके पति दोनों ने अपने वात्सल्यभाव को वृक्षों के साथ विभक्त करने का संकल्प किया। नये नये वृक्षों का संरोपण एवं सम्पोषण दम्पती का लक्ष्य बन गया। दिनभर खेतों में काम करने के पश्चात् शाम को राजमार्ग के दोनों ओर वृक्षारोपण कार्य में संलग्न हो जाते थे। प्रकृति के प्रति अनुरागी दम्पती के सतत श्रम एवं दृढप्रयत्न से 4 मील पर्यन्त दूरी तक राजमार्ग प्राय: 400 वट वृक्षों से आच्छादित हरा भरा एवं आकर्षक प्रतीत होने लगा। इसके अतिरिक्त वृक्षारोपण का संकल्प लेने वाली 'थिमक्का' ने विभिन्न जाति के 8000 पेड़ लगाकर दक्षिण प्रदेश के ग्राम, नगर, झोपड़ियों के निवासियों द्वारा अपने थिमक्का नाम से पूर्व 'सालुमारदा' उपाधि प्राप्त कर सम्मानित हुई। दक्षिण भारत में 'सालुमारदा' शब्द वृक्षों की पंक्ति के अर्थ में प्रयुक्त होता है। 'सालुमारदा थिमक्का' के वृक्षप्रेम से अभिभूत दक्षिणवासी उन्हें 'वृक्षमाता' सरीखे आदर सूचक सम्बोधन से सम्बोधित करते है। 1991 ई. में 'सालुमारदा थिमक्का' के पति का निधन हो गया। इस घोर संकटकाल में भी वृक्षों के प्रति समर्पित 'थिमक्का' तनिक भी विचलित नहीं हुई। शोकसागर से निकलकर पुन: वृक्षारोपण अभियान में प्रवृत्त हो गई। इसी बीच थिमक्का के श्रम एवं समर्पण से अभिभूत उच्चाधिकारी के प्रयत्न प्रत्यक्ष हुए एवं थिमक्का का प्रकृति प्रेम जन प्रेरणा का स्रोत बना। वर्तमान में थिमक्का विश्व में सर्वत्र विश्रुता एवं सम्माननीया है। थिमक्का की महती उपलब्धियों में से कुछ यहाँ उल्लेखीनय है-

1. 1996 -National citizen Award
2. 1997 इन्दिरा गांधी प्रियदर्शिनी वृक्षमित्र सम्मान से सम्मानिता।
3. कल्पवल्ली उपाधि से सम्मानित किया गया।
4. 2015 'प्रकृति प्रिया सालुमारदा' पुस्तक का प्रकाशन
5. 2016 विश्व की 100 प्रभावशाली महिलाओं में

प्रतिष्ठित वृक्षारोपण का संकल्प मन में धारण कर प्रारम्भ की गई शून्य से शिखर की ओर बढ़ती हुई सालुमारदा थिमक्का की भव्य यात्रा लोक में प्रेरणादायक है।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

## निवेदन

**भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.- 09352030291/8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।**

नाम.................................... ...........पुत्र/पुत्री श्री...........................भवन संख्या...........

गली/ मोहल्ला/कॉलोनी........................................वाया/पोस्ट ऑफिस....................................

तहसील................................जिला...............................राज्य........................................

देश..................पिन...........................................दूरभाष..........................................

मोबाईल नं............................ईमेल.......................................................................

निवेदक **सुदामा शर्मा**, प्रबन्ध सम्पादक

**भारती संस्कृत मास पत्रिका**

बी-15, भारती भवन, न्यू कॉलोनी, जयपुर-302001 (राज.) दूरभाष-2379014

ई-मेल - sanskritbharti09@gmail.com

आयुर्वेद-स्तम्भः

# द्राक्षा स्वादुफला प्रोक्ता

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**वर्तमानकाले सम्पूर्णे भूमण्डले परिवहन-साधानान्याविष्कृततमरूपेण प्रचलितानि परिव्याप्तानि च सन्ति। अस्मात्कारणात् कस्मिंश्चिदपि देशे समुत्पन्नानि द्रव्याणि सम्पूर्णे भूमण्डले उपयोग-योग्यानि भवन्ति। भारतवर्षेऽप्येतादृशी स्थितिः वर्तते। प्राचीनकाले भारतवर्षस्यैकस्मिन्भूभागे समुत्पन्नानां फलानामन्येषाञ्चाहारद्रव्याणां उपभोग-स्तु तद्देशीयैर्जनैरेव क्रियते स्म। तस्मिन् समये तेषामेव द्रव्याणामुपभोगस्तु अन्यदेशस्थैर्जनैरार्द्रस्वरूपेऽ-सम्भवः आसीत्। अतएव केषाञ्चिद् द्रव्याणा-मुपयोगः संशुष्कायामवस्थायामेव सम्भव आसीत्। एतादृग्विधेषु फलात्मकेषु द्रव्येषु द्राक्षाफलानां गणना प्रमुखरूपेण वर्तते।**

वर्तमानकाल में सम्पूर्ण भूमण्डल पर आवागमन के साधन आविष्कृततम रूप से प्रचलित और परिव्याप्त हैं। इस कारण किसी भी देश में समुत्पन्न द्रव्य सम्पूर्ण भूमण्डल पर उपभोग के योग्य होते हैं। भारतवर्ष में भी ऐसी ही स्थिति है। प्राचीनकाल में भारतवर्ष के एक भूभाग में उत्पन्न फलों का और अन्य आहार द्रव्यों का उपभोग उस देश (भूभाग) के लोगों द्वारा ही किया जाता था। उन्हीं द्रव्यों का उपभोग अन्यदेश में स्थित लोगों द्वारा आर्द्र स्वरूप में तो असम्भव था। इसलिए कुछ द्रव्यों का उपयोग सूखे रूप से ही सम्भव था। इस प्रकार के फलस्वरूपक द्रव्यों में द्राक्षाफलों की गणना प्रमुख रूप से है।

**द्राक्षाफलानि विशेषेण वृष्याणि रुचिकराणि बृंहणस्वरूपाणि च भवन्ति। अतएव प्राचीनकालत एव एतेषामुपयोगे वैशिष्ट्यं वर्तते। द्राक्षाफलानां गुणकर्मप्रसङ्गे चरकाचार्यः निर्दिशति यदेतानि फलानि परमोपयोगीनि भवन्ति। यथाहि-**

**द्राक्षा पक्वा सरा शीता चक्षुष्या बृंहणी गुरुः।**
**स्वादुपाकरसा स्वर्या तुवरा सृष्टमूत्रविट्।।**
**कोष्ठमारुतकृद् वृष्या कफपुष्टिरुचिप्रदा।**
**हन्ति तृष्णाज्वरश्वासवातवातास्रकामलाः।।**
**कृच्छ्रास्रपित्तसंमोहदाहशोषमदात्ययान्।**
**(भा.प्र.नि. आम्रादिफलवर्ग 91-94)**

द्राक्षाफल विशेष रूप से वृष्य, रुचिकर और बृंहण स्वरूपक होते हैं। इसलिए प्राचीनकाल से ही इनके उपयोग में वैशिष्ट्य है। द्राक्षाफलों के गुणकर्म के प्रसङ्ग में आचार्य चरक निर्देश करते हैं कि ये फल परमोपयोगी होते हैं। यथा-

पके हुए द्राक्षा सर, शीत, चक्षुष्य, बृंहण और गुरु होते हैं। ये रस और विपाक में मधुर, स्वर के लिए हितकर, कषाय रस वाले, मूत्र, और पुरीष का विसर्जन कराने वाले, कोष्ठ में वायु को उत्पन्न करने वाले, वृष्य, कफ की पुष्टि करने वाले और रुचिप्रद होते हैं। ये तृष्णा, ज्वर, श्वास, वात, वातरक्त, कामला, कृच्छ्र रक्तपित्त, संमोह, दाह, शोष, मदात्यय आदि रोगों को नष्ट करते हैं।

**एते सर्वे गुणाः संशुष्काणां द्राक्षाफलानां प्रकीर्तिताः। यतोहि तस्मिन्काले संशुष्काणामेव**

**द्राक्षाफलानां प्राप्तिः सर्वत्र भवति स्म। वर्तमानकाले त्वार्द्राणां द्राक्षाफलानां प्राप्तिः सुसम्भवा वर्तते। अतएव ये आर्द्राणां ''अंगूर'' नाम्ना प्रसिद्धानां द्राक्षाफलानां भक्षणं कुर्वन्ति, तेऽप्युपरि कथितानां-सम्पूर्णानां गुणानामवाप्तिं कुर्वन्ति। यावदार्द्राणा-मंगूरफलानां प्राप्तिर्भवति तावत्त्वेतेषामेव प्रयोगः सुखदः शुभदः सुफलदश्च भवति। ये स्वस्थाः पुरुषाः सन्त्येतेषां फलानां सम्पूर्णं फलं ते प्राप्नुवन्ति। स्वादुपाकरसान्येतानि फलानि शीतवीर्यात्मकानि भवन्ति। चक्षुष्याणि बृंहणात्मकानि रुचिप्रदान्येतानि च शरीरे बलमुत्पादयन्ति व्याधिक्षमत्वं च विशेषेण संस्थापयन्ति प्रयोगकर्तुः शरीरे। सद्य एव रसरक्त-वृद्धिकराण्येतानि ग्रीष्मे विशेषेण सन्तर्पणात्मकानि भवन्ति।**

ये सभी गुण संशुष्क द्राक्षाफलों के कहे गये हैं। क्योंकि उस काल में संशुष्क द्राक्षाफलों की ही प्राप्ति सब जगह होती थी। वर्तमान में तो ताजा द्राक्षाफलों की प्राप्ति सम्भव है। इसलिए जो अंगूर नाम से प्रसिद्ध ताजा द्राक्षाफलों का भक्षण करते हैं, वे भी ऊपर कहे गये सम्पूर्ण गुणों की अवाप्ति करते हैं। जब तक ताजा अंगूर के फलों की प्राप्ति होती है तब तक उनका ही प्रयोग सुखदायक, शुभ और फलदायक होता है। जो स्वस्थ पुरुष होते हैं वे इन फलों का सम्पूर्ण फल प्राप्त करते हैं। मधुर रस और विपाक वाले ये फल शीतवीर्य वाले होते हैं। चक्षुष्य, बृंहण, रुचि उत्पन्न करने वाले ये शरीर में बल उत्पन्न करते हैं, प्रयोग करने वाले के शरीर में विशेष रूप से व्याधिक्षमत्व का संस्थापन करते हैं। शीघ्र ही रस, रक्त की वृद्धि करने वाले ये ग्रीष्म में विशेष रूप से सन्तर्पण करने वाले होते हैं।

**ये क्षतक्षीणातिस्थूलातिकृशबालवृद्धदुर्बल-श्रान्तपिपासितक्षुधितकर्मभाराध्वहतोपवासमैथुना-ध्ययनव्यायामचिन्ताप्रसक्ताः सन्ति त एतेषामुपयोगेन सद्य एव प्रशान्तिं लभन्ते। एतदतिरिक्तं ये क्षामगर्भिणीसुकुमारसंवृतकोष्ठाः (वायुनाऽल्पी-कृतकोष्ठाः) सन्ति तैरप्येतेषां प्रयोगः बलप्रदः सुखपरिणामकरश्च भवति क्रूरकोष्ठानां कृते त्वेतानि फलानि कोष्ठमार्दवकराणि भवन्ति। ऊर्ध्वरक्त-पित्तोर्ध्ववातहृद्रोगोदावर्तमूत्राघातप्लीहगुल्मोदर-स्वरोपघाततिमिरादिभिर्ग्रस्तानां रोगिणां कृते त्वेतानि फलान्यमृतस्वरूपाणि सद्यः बलप्रदानि रोगापनयने च सहायकानि भवन्ति। आहारपाकप्रक्रियाया-मग्न्यनुरूपाणि मृदुस्वरूपाण्येतानि फलानि शीघ्रमेव रसे रक्ते च परिणमन्ति। तथान्येषामपि धातूनां पोषणं संवर्धनं संरक्षणंच कुर्वन्ति।**

जो क्षतक्षीण, अतिस्थूल, अतिकृश, बाल, वृद्ध, दुर्बल, थका हुआ, प्यासा, भूखा, कर्म करने, भार ढोने, पैदल चलने से त्रस्त, उपवास, मैथुन, अध्ययन, व्यायाम और चिन्ता से ग्रस्त हैं वे इनके उपयोग से तुरन्त ही शान्ति प्राप्त करते हैं। इसके अतिरिक्त जो क्षाम (क्षीणशरीर), गर्भिणी, सुकुमार, संवृतकोष्ठ (कम स्थान वाले कोष्ठयुक्त) हैं उनके द्वारा इनका प्रयोग बलप्रद और सुख परिणाम कर होता है। क्रूरकोष्ठ वालों के लिए ये फल कोष्ठ को मृदु करने वाले होते हैं। ऊर्ध्वग रक्तपित्त, ऊर्ध्ववात, हृद्रोग, उदावर्त, मूत्राघात, प्लीह रोग, गुल्म, उदररोग, स्वरोपघात, तिमिर (आँखों के आगे अँधेरा छा जाना) आदि से ग्रस्त के लिए अमृत स्वरूप ये फल शीघ्र ही रस, रक्त में परिणमित होते हैं तथा अन्य धातुओं का पोषण, संवर्धन और संरक्षण करते हैं।

**रक्तवृद्धिकराण्येतानि फलानि रक्ताल्पतामपहृत्य गर्भिणीभ्यः बलप्रदानि भवन्ति। गर्भस्थस्य बालकस्य च कृते पुष्टिकराणि भवन्ति। याः स्त्रियः किशोर-वयसि समागताः बालिकाश्च रजः स्रावाधिक्येन रक्ताल्पतया च सम्पीडिताः भवन्ति ताभिस्त्वेतेषां फलानां सेवनमौषधिस्वरूपात्मकं भवति। अत्यन्तमधुरस्वरूपाण्येतानि फलानि प्रमेहे मधुमेहे च पूर्णरूपेण निषिद्धानि सन्ति। ये चेष्टाद्वेषिणः दिवास्वप्नशय्यासनसुखे च निरता भवन्ति तैरपि चैतेषां सेवनमवधानतयैव करणीयम्। ये च पिडकाकोष्ठकण्डूतन्द्राग्रस्ता भवन्ति तैरपि चैतेषां सेवनं स्वल्पमात्रया करणीयम्। बृंहणात्मकान्येतानि मेदस्वितां जनयन्त्यत एव स्थौल्यैरेतेषां सेवनमवधानतयैव करणीयम्।**

रक्त की वृद्धि करने वाले ये फल रक्ताल्पता को दूर करके गर्भिणी को बल प्रदान करते हैं। गर्भस्थ बालक के लिए पुष्टिकर होते हैं। जो स्त्रियां और किशोर अवस्थामें पहुँची बालिकायें रजःस्राव की अधिकता से और रक्ताल्पता से पीड़ित हों उनके द्वारा इन फलों का सेवन औषधिस्वरूपात्मक होता है। अत्यन्त मधुरस्वरूप वाले ये फल प्रमेह और मधुमेह में पूर्णरूप से निषिद्ध हैं। जो चेष्टा नहीं करने वाले और दिन में सोने वाले और सोने, बैठने का सुख लेने वाले हों उनके द्वारा इनका सेवन सावधानी से ही करना चाहिए। जो पिडका, कोष्ठ, कण्डू, तन्द्रा से ग्रस्त होते हैं उनको भी इनका सेवन स्वल्प मात्रा में ही करना चाहिये। बृंहण करने वाले ये फल मेदस्विता उत्पन्न करते हैं, स्थौल्य में इनका सेवन सावधानी से करना चाहिये।

**आधुनिकाहारविशेषज्ञाः कथयन्ति यदेतेषु फलेषु विशेषण ''जल-शर्करा-सोडियम-पोटेशियम-साइट्रिकएसिड-फ्लोराइड-पोटेशियमसल्फेट-मैगनेशियम्'' इत्यादीनि तत्त्वानि भवन्ति। प्रचुरमात्रायां लौहतत्त्वधारकाण्येतानि फलानि रक्तविवर्धकानि भवन्ति। आधुनिकैः द्राक्षाफलानां ये गुणाः प्रोक्ताः, ते तु प्राचीनोक्तैर्गुणैनधिका एव सन्ति। पुनरपि तैः प्रोक्तानां केषाञ्चिद्गुणानामुल्लेखोऽत्राप्रासङ्गिको न वर्तते। ते कथयन्ति यद् हृद्रोगिभिरेतेषां सेवनं नियमितरूपेण करणीयमेव।**

आधुनिक आहारविशेषज्ञ कहते हैं कि इन फलों में विशेष रूप से जल-शर्करा-सोडियम-पोटेशियम-साइट्रिकएसिड-फ्लोराइड-पोटेशियमसल्फेट-मैगनेशियम इत्यादि तत्त्व होते हैं। प्रचुर मात्रा में लौहतत्त्व ने धारक ये फल रक्त को बढ़ाने वाले होते हैं। आधुनिकों के द्राक्षाफलों के जो गुण कहे हैं वे तो प्राचीनोक्त गुणों से अनधिक ही हैं। फिर भी उनके द्वारा कहे गये कुछ गुणों का उल्लेख करना यहाँ अप्रासङ्गिक नहीं है। वे कहते हैं कि हृद्रोगियों द्वारा इनका सेवन नियमित रूप से करना ही चाहिये।

**यथाहि प्राचीनाचार्याः भ्रमे क्लमेऽग्निमान्द्ये रक्तपित्ते रक्तस्रावाधिक्ये मूत्रकृच्छ्रे चैतेषां फलानामुपयोगित्वं निर्दिशन्ति, तद्वदेवाधुनिकाः अप्येतादृग्विधामेव संस्तुतिं कुर्वन्त्येतेषां द्राक्षाफलानामार्द्रस्वरूपाणामङ्गूराख्यानाम्। चक्षुष्याण्येतानि विटामिन-ए इत्यनेन परिपूर्णानिभवन्ति। पोटेशियम इत्यस्य तत्त्वस्य परिपूर्तिकरणेनैतानि खालित्ये पालित्ये चोपयोगीनि भवन्ति, केशानां**

**प्रपतनमपि निरुन्धन्ति। कृष्णवर्णानि द्राक्षाफलानि हृदयाघातं हृद्रोगं चापवारयन्ति निवारयन्ति च। अतएव ऋतुजातानामार्द्राणां सद्यः सम्प्राप्तानां द्राक्षाफलानां सेवनं समुचितमेव।**

जैसा कि प्राचीन आचार्यों ने भ्रम, क्लम, अग्निमान्द्य, रक्तपित्त, रक्तस्राव की अधिकता और मूत्रकृच्छ्र में इन फलों की उपयोगिता का निर्देश किया है, उसी तरह ही आधुनिक भी अंगूर नाम से प्रसिद्ध इन ताजा द्राक्षाफलों की इस तरह से ही संस्तुति करते हैं। ये चक्षुष्य हैं और विटामिन-ए से परिपूर्ण होते हैं। पोटेशियम इस तत्त्व की परिपूर्ति करने से ये खालित्य और पालित्य में उपयोगी होते हैं, केशों के पतन को भी रोकते हैं। काले वर्ण के द्राक्षाफल हृदयाघात और हृद्रोग का अपवारण (रोकना) और निवारण (होने के बाद दूर करना) करते हैं। इसलिए ही ऋतु में उत्पन्न ताजा और तुरन्त प्राप्त द्राक्षाफलों (अङ्गूरों) का सेवन उचित ही है।

**वर्तमानकाले त्वेतेषां संरक्षणे शीघ्रपरिपाक-प्रक्रियायां च बहुविधानां हानिकारकाणां रासायनिकद्रव्याणां प्रयोगं कुर्वन्ति वणिजः। अतएव सम्यक्तया प्रक्षाल्य सद्यः सम्प्राप्तानां द्राक्षाफलाना-मुपयोग एवावधानतया करणीयः। आचार्येण चरकेण फलवर्गे सर्वप्रथामेव द्राक्षाफलानां गुणकथनं विहितम्। तत्प्रसङ्गस्य व्याख्याने व्याख्याकारः चक्रपाणिः कथयति यत् मृद्वीकाग्रे-ऽभिधीयते श्रेष्ठगुणत्वात् (च.सू. 27)। आचार्येण चरकेण द्राक्षा स्वादुफला प्रोक्ता तथा विभिन्नै-र्गुणैर्मण्डिता। अतएव पुष्टिकरा द्राक्षा यथावश्यक-रूपेणोपयोज्या। संशुष्काणां द्राक्षाफलानामप्येता-दृश्येवोपयोगिता वर्तते। अतएव चरकसंहितायां बहुषु स्थलेषु स्वस्थायामवस्थायां रुग्णावस्थायां चोपयुक्ता द्राक्षा परमोपयोगिस्वरूपे प्रोक्ता। पृथग्लेखे संशुष्काणां द्राक्षाफलानां वर्णन-मभिधास्यते। द्रव्यगुणप्रवाचकाः जयन्त्वाचार्याः जयतु चायुर्वेदः। तैः प्रोक्तानां द्रव्यगुणानां पुष्टिपूर्वकं पुनः कथनं पुनरुक्तवत् प्रतीयते, पुनरप्युपयोगि वर्तते कथमाधुनिकानामाहारविशेषज्ञानाम्।**

वर्तमानकाल में तो व्यापारी इनके संरक्षण और शीघ्र-परिपाक-प्रक्रिया में बहुत प्रकार के हानिकारक रासानिक द्रव्यों का प्रयोग करते हैं। इसलिए ही अच्छी तरह प्रक्षालन करके सद्यः सम्प्राप्त द्राक्षाफलों का उपयोग सावधानी से ही करना चाहिए। आचार्य चरक द्वारा फलवर्ग में सर्वप्रथम द्राक्षाफलों के गुणों को कहा गया है। इस प्रसङ्ग की व्याख्या में व्याख्याकार चक्रपाणि कहते हैं कि श्रेष्ठ गुणवाला होने के कारण फलों में मृद्वीका (द्राक्षाफल) श्रेष्ठ कहा जाता है। आचार्य चरक ने द्राक्षा को मधुरफल कहा है तथा विभिन्न गुण वाला कहा है। इसलिए ही पुष्टिकारक द्राक्षा यथावश्यक रूप से उपयोज्य है। संशुष्क द्राक्षाफलों की भी ऐसी ही उपयोगिता है इसलिए ही चरक संहिता में बहुत से स्थलों पर स्वस्थ अवस्था में और रुग्ण अवस्था में द्राक्षा को उपयुक्त और परमोपयोगी कहा है। पृथक् लेख में शुष्क द्राक्षाफलों का वर्णन किया जायेगा। द्रव्यगुण प्रवाचक आचार्यों की जय हो आयुर्वेद की जय हो। उनके द्वारा कहे गये द्रव्य गुणों का पुष्टिपूर्वक फिर से कथन पुनरुक्त की तरह प्रतीत होता है, फिर भी आधुनिक आहार विशेषज्ञों का कथन उपयोगी है।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

संस्कृत समाचारः

# संस्कृतसुधीभ्यो राष्ट्रपतिसम्मानः



संस्कृतवैदुष्यस्य सम्माननाय प्रत्यब्दं भारतराष्ट्र-पतिना प्रायः 15 संस्कृतविद्वांसः पञ्चलक्षमुद्रासमर्पण-पूर्वकं प्रशस्तिपत्रादिप्रदानेन सम्मान्यन्ते, युवविद्वांसश्च ''बादरायणपुरस्कारेण'' (एकलक्षमुद्रात्मकेन) सम्मान्यते इति विदन्त्येव विद्वांसः। एतेषां घोषणा स्वातन्त्र्यदिवसोपरि विधीयते। केनचित् कारणेन 2017 ई. वर्षे तादृशी घोषणा स्वातन्त्र्यदिवसोपरि नाक्रियत, परवर्तिनि 2018 ई. वर्षे 2017-18 वर्षयोः सम्मानानां घोषणा विहिताऽभूदित्यपि जानन्त्येव विपश्चितः। सम्माननमेवं-विधं राष्ट्रपतिना ससमारोहं विधीयते।

गतेषु त्रिषु वर्षेषु घोषितसम्मानानां विदुषां सम्मानन-समारोहः गते एप्रिल (2019 ई.) मासे राष्ट्रपतिभवनस्य अशोकसभागारे व्यधीयत। शताधिकं संस्कृत-प्राकृत-आरब्यतमिलप्रभृतिप्राचीन-भाषा-विचक्षणा अत्र श्रीवेंकटैयानायुडु महोदयेन (उपराष्ट्रपतिना) सम्मान-पत्रप्रदानपूर्वकं सभाजिताः, राष्ट्रपतिमहोदयेन च वर्धापिताः। एतेषु विद्वत्सु जयपुरीयाः सुधियोऽपि समभूवन्। वेदविज्ञान-संस्कृतसाहित्यादिक्षेत्रे सुचिराय समुल्लेखनीयं योगदानं विधाय ''इन्द्रविजया'' दिग्रन्थानां सम्पादनादिकार्यं कृतवती संस्कृत-संस्कृतिसंवर्धनाय समारोहाणामायोजनं कृतवती राजस्थानविश्वविद्यालये संस्कृतविभागाध्यक्षपदं शोभितवती डॉ. लक्ष्मीशर्मा (2016 ई.) समारोहेऽस्मिन् सम्ममान्यत।

काव्य-नाटक-गद्यपद्यादिप्रभृतग्रन्थलेखनेन संस्कृतसाहित्यं समेधितवान् राजस्थानविश्वविद्यालयीय-संस्कृतविभागे सुचिराय आचार्याध्यक्षादिपदानि समधिष्ठाय विविधैः प्रकारैः संस्कृतसाहित्यस्य श्रीवृद्धिं कृतवान् डॉ. शिवसागरत्रिपाठिवर्योऽपि विगतवर्षोपलक्ष्ये राष्ट्रपतिसम्मानं लब्धवान् जयपुरीयः सुधीवरोऽस्ति।

जयपुरे जगद्गुरुरामानन्दाचार्यराजस्थानसंकृतविश्व-विद्यालये साहित्यविभागे सहायकाचार्यपदमल-ङ्कुर्वाणः सुप्रतिष्ठितः कविवर्यः, वैदुष्यसम्पत्सुशोभितो युवा सुधीः डॉ. उमेश नेपाल महोदयोऽस्मिन् बादरायणपुरस्कारेण सम्मानितोऽभूत्। राजस्थानीयो वैदिक विद्वत्प्रवरः श्री बदरीनारायण पंचोली (2017 ई.) राष्ट्रपतिसम्मानमलभत। इत्थं वर्षत्रये घोषितसम्माना विद्वांसो भारतराजधान्यां सममान्यन्त।









प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
**पाञ्चजन्य**

(English) Weekly
**ORGANISER**

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क

भारत में ₹ 700/- पाञ्चजन्य • ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

**प्रसार विभाग**
**भारत प्रकाशन (दिल्ली) लिमिटेड**
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,